CALCUTTA SANSKRIT COLLEGE RESEARCH SERIES, NO. X.

# अनुमितेर्मानसत्वविचाररहस्यम्

( श्रीहरिरामतर्कवागीशविरचितम् )

S
H 225 A

# ANUMITER MĀNASATVAVICĀRARAHASYAM

*Calcutta Sanskrit College Research Series, No. X.*

Published under the auspices of the
Government of West Bengal

TEXTS NO. 7

# अनुमितेर्मानसत्वविचाररहस्यम्

( श्रीहरिरामतर्कवागीशविरचितम् )

SANSKRIT COLLEGE
CALCUTTA
1959

*Board of Editors* :

Dr Radhagovinda Basak, M.A., Ph.D., *Chairman*

Dr Suniti Kumar Chatterji, M.A., D.Litt. (Lond.)

Professor Durgamohan Bhattacharyya, M.A.,
Kāvya-Sāṃkhya-Purāṇatīrtha

Professor Anantakumar Nyāya-Tarkatīrtha

Dr Gaurinath Sastri, M.A., D.Litt.,
*Secretary and General Editor*

# ANUMITER MĀNASATVAVICĀRARAHASYAM

OF

ŚRĪ HARIRĀMA TARKAVĀGĪŚA

WITH THE COMMENTARY SARALĀ

BY

TĀRĀNĀTH NYĀYA-TARKATĪRTHA

*Senior Research Fellow, Sanskrit Seminar,*
*Government Sanskrit College, Calcutta.*

EDITED BY

GAURINATH SASTRI

*Principal, Sanskrit College, Calcutta.*

SANSKRIT COLLEGE
CALCUTTA
1959

*Published by*
The Principal, Sanskrit College,
1, Bankim Chatterjee Street, Calcutta-12

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 997
Date 8.10.65
SIMLA

**Price : Rupees eight only**

S
181.43
H225 A

Library IIAS, Shimla
S 181.43 H 225 A-H 225 A: 1
00000997

*Printed by*
S. N. Guha Ray at the Sree Saraswaty Press Limited,
32, Acharjya Prafulla Chandra Road, Calcutta 9

कलिकाता-संस्कृतमहाविद्यालयगवेषणग्रन्थमाला—ग्रन्थाङ्कः १०

# अनुमितेर्मानसत्वविचाररहस्यम्

( श्रीहरिरामतर्कवागीशविरचितम् )

कलिकातासंस्कृतमहाविद्यालयस्थ-संस्कृतविद्यागोष्ठीगवेषणा-
विभागीयान्यतमप्रधानाध्यापकेन

**श्रीमता तारानाथन्यायतर्कतीर्थेन**

विरचितया सरलाख्यया टीकया समलङ्कृतम्

कलिकातासंस्कृतमहाविद्यालयाध्यक्षेण

**श्रीमता गौरीनाथशास्त्रिणा**

सम्पादितम्

१८८१ तमशकवत्सरे कलिकातानगर्यां प्रकाशितम्

# FOREWORD

I am very glad that a third work of Harirāma Tarkavāgīśa could be edited by my humble self with a new commentary from the pen of my teacher Pandit Taranath Nyāya-Tarkatīrtha who is in our midst to-day as one of the Senior Research Fellows of this institution. The manner in which Harirāma has discussed the problem is strikingly original and justifies his reputation as an astute logician whom Gadādhara Bhaṭtacharyya accepted as his teacher. The new commentary which has been written in a lucid style will help the reader in understanding the difficult text and ascertaining the value and importance of the dialectics which the author has introduced.

It is difficult on my part to express adequate gratitude to the erudite commentator who is regarded as one of the few front-rank Naiyāyikas of the present generation. The earnestness with which he agreed to my proposal of writing a commentary evinces his deep interest in literary pursuits even in these advanced years of his life as also his loving affection for his students, however humble they might be. And I must conclude by expressing my sincerest thanks to my pupil Sri Gopikamohan Bhattacharyya, and Pandit Jagadish Chandra Tarkatīrtha of my Publication Department who have rendered valuable assistance in seeing the work through the press.

GAURINATH SASTRI

# CONTENTS

| | | |
|---|---|---|
| | | *Page* |
| 1. | Foreword | ix |
| 2. | English Introduction | xiii |
| 3. | Manuscript Material | xix |
| 4. | Sanskrit Introduction | xxi |
| 5. | Text of *Anumiter mānasatvavicārarahasyam* with the commentary *Saralā* | 1-43 |

# INTRODUCTION

Indian philosophers in general have classified topics for discussion under two general heads: *pramāṇa* and *prameya*. And they are found to hold divergent views on both of these two topics. So far as *pramāṇa* is concerned we find the Cārvāka believing in the authority of only one *pramāṇa*, viz., perception, while the Vedāntin recognizes as many as six *pramāṇas*. Excepting the Cārvāka all the other schools of Indian philosophers have acknowledged the authority of inference as an instrument of valid knowledge. It may be that there is difference of opinion with regard to the nature of inference among all these different schools of thought. While the Naiyāyika admits five-membered syllogism, the Vedāntin puts his faith in three-membered only. Yet it may be stated without any fear of contradiction that with the lone exception of the Cārvākas the value and importance of inference as a source of valid knowledge has not been challenged by any other school of philosophers, both orthodox and heterodox.

The Cārvāka, while decrying the validity of inference as an organ of knowledge, observes that when at the sight of a volume of smoke issuing forth from a hill-top we infer the existence of fire thereon it is either a case of probability or false ascription and never a case of valid knowledge. For all the different schools of philosophers who pin their faith on the authority of inference would declare that inference is drawn on the strength of the knowledge of invariable concomitance between the probans and the probandum. That is to say, in case of ascertainment of the existence of fire from smoke on a hill-top, we must be sure that smoke is universally attended by fire. But it is contended by the Cārvāka that perceptual cognition cannot deliver the knowledge of the requisite concomitance in view of the obvious fact that perception enables us to discover relationship in such specific cases as present themselves to the senses. Thus mere observation of co-presence of two terms cannot lead to the knowledge of universality and necessity of their relation. In spite of the knowledge of frequency of co-presence of two terms there is no guarantee whatsoever that in future, smoke will not exist in the absence of fire. The Cārvāka, therefore, argues that it is impossible to determine the necessary relation between all individual smokes and all individual fires. Whatever might be the merit of the arguments of the Cārvāka against the acceptance of inference as an independent source of knowledge, the Buddhist and the Naiyāyika, in particular, concur in recognizing its value as a fruitful instrument of cognition and have taken great pains to counter-act the criticisms advanced by the Cārvāka.

In the present work, which comes from the pen of Harirāma Tarkavāgīśa, an illustrious exponent of Neo-logic, we find how the astute logician

unlike all others belonging to his own school of thought seeks to establish the claims of inference to be recognized as an independent source of valid cognition. He starts the discourse by referring to a view which, of course, it is difficult for us to identify at this distant date, and which would seek to explain away inference as a case of supersensual perception.

According to that view, as Harirāma records it, the synthetic judgment (*parāmarśa*) following upon the remembrance of concomitance would give rise to a perceptual knowledge of the probandum and not its inference. In a case of doubt it is observed that the perceptual knowledge of the property of the pervaded (*vyāpya-dharma*) of any one of the two extremes gives rise to the perception of that extreme. Thus in the instance, 'Is it a tree or a human being', if one perceives the branches, the twigs and the like, which are determined by the tree-universal, one should have the perception of the tree. If, however, one perceives the different limbs of the human organism which are determined by the man-universal one would perceive the human being. Likewise, if one witnesses smoke coming out of the hill one should have the perceptual knowledge of fire as the latter is determined by smoke. It comes to this, therefore, that the knowledge of fire is not a case of inference but one of perception. It may however be objected that the perception of an object is conditioned by sense-object contact and as the same sense-object contact is not available in the case under consideration, it would not stand to reason to claim that the afore-mentioned instance is a case of perceptual knowledge. To this the obvious reply would be: Yes, surely there is no sense-object contact in the above instance and as such it is not an instance of ordinary perception. But when the Naiyāyika believes in the authority of perception springing from supersensual contact there cannot be any valid ground for denying it as a case of perception of that type. The knowledge of fire at the sight of smoke may be explained as due to the memory-knowledge of fire resulting from the perception of fire as associated with smoke on previous occasions. So when a volume of smoke is seen issuing forth from a hill-top, fire is presented to the senses through that memory-knowledge. And such memory-knowledge functioning as the contact, the so-called inferential knowledge may be looked upon as a case of super-sensual perception.

We have seen above how a school of thinkers has sought to reduce inference to supersensual perception. But it should be pointed out that there are cases of inference which cannot be explained away by super-sensual perception. Thus super-sensual contact may be available only in cases of exclusively affirmative (*kevalānvayin*) and affirmative-cum-negative (*anvaya-vyatirekin*) inference. But in the case of exclusively negative inference (*kevalavyatirekin*) such super-sensual contact is not available and as such the question of super-sensual perception cannot

arise. To take an example, 'The earth is different from others, because it is determined by the earth-universal'. This is a typical case of *kevala-vyatireki-anumāna* since it is exclusively based on negative concomitance. In this syllogism, earth is the subject of the inference, difference from what it is not, that is to say, from others (*itara-bheda*) is the probandum while the earth-universal is the probans. Now this inference results from a negative synthetic judgement which would be : Earth is determined by the earth-universal which is the negatum of negation pervading otherness (i.e., *itaratva*). Unlike affirmative synthetic judgment, there is no possibility of knowing the probandum i.e., difference from others (*itara-bheda*) in this negative synthetic judgment. As such the question of super-sensual contact through memory-knowledge is not possible. To this the rejoinder will be that though super-sensual contact through *jñāna-lakṣaṇa-sannikarṣa* cannot yield the perception of the probandum still super-sensual contact through universals (*sāmānya-lakṣaṇa-sannikarṣa*) will enable us to obtain its perceptual knowledge.

Let us explain the point in detail. What has been stated before is that the probandum viz., *itara-bheda* being not amenable to previous cognition cannot be presented to senses through memory-knowledge, but this *itara-bheda* which is after all a species of *bheda* may indeed be presented to the senses on the strength of the generic attribute determining it.

To this objection of course Harirāma replies that the perception following in the wake of synthetic knowledge is of the type 'I infer' and not 'I perceive'. After the emergence of synthetic judgment the content of which is of the form 'the hill is possessed of smoke as determined by fire', the resultant knowledge (viz., knowledge of fire-on-the-hill) must be accepted as inferential in character inasmuch as the introspection of that resultant knowledge takes the form 'I infer' (*aham anuminomi*). Thus the nature of the resultant knowledge is determined by introspection. Hence the inherent difference between the two sources of knowledge, perception and inference, is attested by the introspection following upon each of them.

The opponent may, however, contend that the introspection as referred to above does not prove that inference is a distinct type of knowledge but what it establishes is only a particular objectivity in the knowledge, viz., fire-on-the-hill is of the form of a predicable and nothing more. But Harirāma points out that in order to determine the aforesaid objectivity which is in the form of a predicable there is no other way but to accept the knowledge of invariable concomitance etc. as the conditions for the same. And this, Harirāma thinks, will ultimately lead us to an admission of the knowledge of invariable concomitance as the source of a type of valid knowledge. In this context it may be noted that Harirāma has opined that there is an identical objectivity (*vidheyatā*) which is common

to the different kinds of knowledge viz., the super-sensual perception (which in the opinion of the opponent replaces inference), inference and verbal knowledge. And in this context he answers an objection, viz., if objectivity be one identical principle it fails to explain the difference in the three types of knowledge, by saying that notwithstanding the identity of objectivity the difference in the knowledges could be traced to the difference in their respective conditions. For example, it is the knowledge of concomitance that determines the character of inference as differing from other types of knowledge. It is not required of any special form of objectivity to account for the inferential knowledge as such.

It is worthy of notice, however, that our present commentator has substantially differed from the view of Harirāma on this issue. He thinks, and rightly so, that there are different kinds of objectivity and that the inherent divergence in the character of objectivity is to be explained by the respective knowledge-hood, e.g., inference-hood (*anumititva*) in the case of inference. Such knowledge-hood as *anumititva* etc. are, in the opinion of the commentator, obtainable on the strength of definite Vedic texts *śrotavyo mantavyo nididhyāsitavyaḥ*, etc.

Let us now turn our attention to another contention of the opponent. He observes that even if inference is admitted for the sake of argument, yet it may be subsumed under perception as one of its variety in the same way as ocular perception or tactual perception is regarded as different species of perceptual knowledge. And hence the source of that kind of perceptual knowledge would be nothing but a kind of instrument of perception. But Harirāma observes that such a position is opposed to the deliverence of experience; for if inference were only a type of perception then in all cases of inference one should have the experience that the same is perceptual in character which to all intents and purposes is not attested by the verdict of experience.

The opponent may further contend that if it be assumed for the sake of argument that *anumititva* as an universal is established through introspection, yet the same *anumititva* may well be regarded as an instance of super-sensual perception through memory-knowledge. To this Harirāma replies by saying that the opponent seems to be of the opinion that all cases of inference are cases of super-sensual perception. Now it is admitted on all hands that where the conditions of inference of any particular object are present the conditions of perceptual knowledge can only exist provided the object of the perceptual knowledge is identical in form with the object of inference. In case the object of inference and the object of perception are of different forms and not strictly identical in character the conditions of inference prevail over the conditions of perception with the result that we have a case of inferential knowledge and not a perceptual one. As this rule is admitted by the opponent also he can no longer

say that every case of inferential knowledge can be shown to be a case of super-sensual perception or, for the matter of that, perception. If, the conditions of inference under all circumstances would have co-existed with the conditions of perceptual knowledge then and then only the position of the opponent would have some justification.

G. SASTRI.

# MANUSCRIPT MATERIAL

The present work embodies a critical edition of Harirāma Tarkālaṅkāra-Tarkavāgīśa's *Anumiter mānasatvavicāraḥ* deposited in the Calcutta Sanskrit College Library. Aufrecht's Catalogus Catalogorum contains a list of manuscripts of Harirāma's works and the work has been mentioned there as *Anumitimānasa.*[1] MM. Dr S. C. Vidyabhusan in his *History of Indian Logic* mentions a few of Harirāma's works. But the present work of Harirāma has not been mentioned by him.

The edtion is based on only one manuscript written in Bengali character on hand-made paper. The relevant details are as follow :

| | | |
|---|---|---|
| Nyāya No. | .. | $\frac{17}{143}$ |
| Substance | .. | Paper |
| Size | .. | 17½″ × 3″ |
| Folios | .. | 7 |
| Lines | .. | Eight to a page |
| Script | .. | Bengali |
| Date | .. | Not mentioned |

It is complete and bound up with *Prāmāṇyavāda* of Harirāma. It begins with श्रीश्रीरामचन्द्राय नमः। Page-number begins with 48 on the right margin. The post-colophon occurs as श्रीश्रीहरिशर्मणः स्वाक्षरमिति। All the pages have श्रीः writtin on the right margin. Appearance is old. अनुमितिमानसत्व, अनुमितित्वमानसत्व or sometimes अनुमितिमानसत्वयोः is written on the right margin of each folio. There are occasional corrections on the upper and the lower margin. A hole is left in the middle of the folios for the string to pass. The writings of some of the folios are slightly faded. Otherwise the writing though small is clearer, neat and compact. Square blanks are left in the middle. Sometimes paler ink has been used for erasure. A portion of folio 5 begins with bolder letters. Reading is fairly correct.

---

1 Catalogus Catalogorum p. 18, 760.
Cf also, Catalogue of Sanskrit Manuscripts in the Sanskrit College Library, Benaras, p. 198.

# निवेदनम्

वङ्गेषु सुप्रसिद्धे नवद्वीपधाम्नि कृतवसतिना नैयायिकधुरन्धरेण श्रीहरिरामतर्कवागीश-महोदयेन विरचितानां कतिपयन्यायग्रन्थानामन्यतमोऽयम् "अनुमितेर्मानसत्वविचाररहस्य"-नामा ग्रन्थः। कलिकातास्थराजकीयसंस्कृतमहाविद्यालयस्य ग्रन्थागारे एतस्यैकं जीर्णं प्राचीनहस्तलिखितपुस्तकमधिगत्य ग्रन्थस्योपादेयताञ्चानुभूय तत्प्रकाशसमुत्सुकेन तस्य महाविद्यालयस्याध्यक्षप्रवरेण श्रीमता गौरीनाथशास्त्रिमहाभागेनाहमनुरुद्ध एतट्टीकाप्रणयने प्रवृत्तः। प्रथमतो निरवशेषमेतत्पुस्तकं साभिनिवेशं पठित्वा तत्र मया सुगमा बहवो लेखकप्रमादाः परिलक्षिताः, अपि च दुरूहाणि बहून्यसङ्गतिस्थानानि समनुभूतानि येषां परिवर्तनेन पाठान्तरकल्पनां विना ग्रन्थसङ्गतिर्भवितुं नार्हति, परमस्यादर्शपुस्तकमेक-मेवासीदिति सहायान्तरविरहविधुरेणापि मया सम्यग् विचिन्त्य तत्र तत्र यथामति सङ्गत-पाठं परिकल्प्य मूले तस्य स्थापना कृता, टीकायान्तु आदर्शपुस्तकापपाठस्योल्लेखपूर्वकं कुत्र कियानंशः परिवर्तित इति वैशद्येन प्रदर्शितम्। तादृशपाठसंशोधने टीकाप्रणयने च मत्कृतश्रमस्य कियत् साफल्यं सञ्जातमित्यत्र तु विद्वांस एव प्रमाणम्। तथा हि महाकवि-भाषितम्—"आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्" इति। यद् भवतु, एतद्ग्रन्थकारः श्रीहरिरामतर्कवागीशमहोदयो जन्मना कदा कं देशमलञ्चकारेतिनिर्णये सुष्ठु प्रमाणं मया किमपि नासादितम्, केवलं किंवदन्तीमनुसृत्यैव तस्य नवद्वीपवासित्व-मुल्लिखितम्। एतद्ग्रन्थकारस्य पाण्डित्यं महत्, विचारप्रतिभा च महत्तरा। अत्र ग्रन्थे पूर्वपक्षोपस्थापने तत्रापि च विशेषतः—१। मानसज्ञानं प्रति विरोधिसामग्र्याः प्रतिबन्धक-तायामिच्छाया उत्तेजकत्वमनङ्गीकृत्य प्रकारान्तरेणोपपादनविषये, २। कामिनीजिज्ञासायाः-प्रतिबन्धकत्वविषयकपर्यालोचने च ग्रन्थकारेण परानुद्भावितपूर्वा यादृश्यो विचारपद्धतयः परिदर्शितास्ताभिः पाठकानां नवीनरीतिपरिज्ञानं विचारशक्तेरुन्मेषश्च सम्यग्भविष्यत इत्यत्र नास्ति मे संशयलेशोऽपि। ग्रन्थस्योपसंहारे सिद्धान्तप्रदर्शनावसरे तु ग्रन्थकृतस्तादृग्-युक्तिपाटवं न परिलक्ष्यते, संक्षेपत एव समाधानं कृतमस्ति। इदानीं सहृदयान् पाठक-महोदयान् प्रति सविनयमिदं मे समावेदनं यदत्र टीकायां पाठपरिशोधने च यदि केनापि सुधिया मम किमपि वैगुण्यमनुभूयेत तर्हि तेन कृपया तन्मां वेदयित्वा ममोपकारः करणीय इत्यलं बहुभाषितेन।

**श्रीतारानाथदेवशर्मणः**

# अनुमितेर्मानसत्वविचाररहस्यम्

लिङ्गपरामर्शानन्तरं विलक्षणानुमित्यात्मकप्रमित्युदयात् तत्करणतया च विलक्षणप्रमाणान्तरं तदेवानुमानमित्यभिधीयते।(१)।

अथ वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शानन्तरं तदात्मकविशेषदर्शनमूलक-पर्वतोवह्निमानित्याकारकप्रत्यक्षनिर्णयादेव वह्न्यादिगोचरप्रवृत्त्याद्युत्पत्तेरनुमित्यात्मकविलक्षणप्रमितेरेवासिद्धत्वात् कुतो लिङ्गज्ञानस्य प्रमाणान्तरता। (२)।

नच वह्न्यादिसन्निकर्षं विना तद्गोचरप्रत्यक्षासम्भवादनुमित्यात्मक-

---

प्रणम्य परमात्मानं वाग्देवीं पितरौ गुरून्।
अनुमितेर्मानसत्वविचारस्यातियत्नतः।
बुभुत्सुसुखबोधाय सदावहितचेतसा
क्रियते सरला टीका श्रीतारानाथशर्मणा ॥

(१) न्यायमते "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति श्रुतवतां गुरूपदेशात् समधिगतप्रत्यक्षप्रमाणानां शिष्याणां "किमनुमानमि"ति जिज्ञासया प्रसङ्गसङ्गत्याऽनुमानं निरूपयितुमाह—"**लिङ्गपरामर्शेत्यादि**। "**विलक्षणे**"ति। इतरप्रमितिव्यतिरिक्ततयानुभवसिद्धेत्यर्थः। "**प्रमाणान्तरमि**"ति। प्रत्यक्षादिव्यतिरिक्तप्रमाणविशेषः, सिध्यतीति शेषः। आदर्शपुस्तकेऽत्र "विलक्षणप्रमाणान्तरता" इति पाठो वर्तते स तु न समीचीनः, परवर्तिनः "तदेवानुमान" मित्यस्यासङ्गत्यापत्तेः, अतः "विलक्षणप्रमाणान्तरम्" इति पाठः कल्पितः।

(२) वह्न्यर्थी यत्र धूमं पश्यति तत्र व्यवधानादिवशाद् वह्नेः प्रत्यक्षनिश्चयाभावेऽपि तदर्थं तत्र प्रवर्तत इति दर्शनात् सन्दिग्धवह्निकस्यापि तादृशप्रवृत्त्युपपत्तये तत्रावश्यमनुमित्यात्मक एव वह्निनिश्चयः स्वीकर्तव्य इति सिद्धान्तिनामाशयोपरि पूर्वपक्षमुत्थापयति "**अथे**"त्यादिना। प्रत्यक्षनिश्चयं प्रति ग्राह्यसंशयस्य प्रतिबन्धकत्वेऽपि विशेषदर्शनेन तादृशनिश्चयो भवत्येव, अतो भवदभिमतवह्न्याद्यनुमितिस्थलेऽपि पूर्वं परामर्शात्मकविशेषदर्शनसत्त्वेन वह्न्यादेः प्रत्यक्षनिश्चयो भवितुमर्हति तेनैव तदर्थकप्रवृत्तिरप्युपपद्येत इति पूर्वपक्षतात्पर्यम्। "**लिङ्गज्ञानस्ये**"ति। साध्यव्याप्यत्वेन हेतुज्ञानस्येत्यर्थः, "कुतः प्रमाणान्तरता" इत्यनेनास्य सम्बन्धः।

**प्रमित्यन्तरस्वीकार आवश्यक इति वाच्यं, परामर्शघटितानुमितिसामग्रीकाले साध्यादिभासकसामग्रीज्ञानसन्निकर्षस्यावश्यकत्वात् (३)।**

**न चेतरत्वव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्याकारका-प्रसिद्धसाध्यकपरामर्शदशायामितरभेदादिरूपसाध्यादिज्ञानानैयत्यात् तादृश-परामर्शात् प्रमित्यन्तरस्वीकार आवश्यक इति वाच्यं, तादृशपरामर्शदशाया-मितरभेदादिविषयकज्ञानानैयत्येऽपि तत्रेतरत्वघटकीभूतभेदत्वादिसामान्यधर्म-ज्ञानावश्यम्भावात् सामान्यलक्षणसन्निकर्षादेव इतरभेदादिगोचरप्रत्यक्षसम्भवा-दिति (४) चेन्न, अस्ति हि अनुमिनोमीत्याकारकलिङ्गपरामर्शानन्तरोत्-पन्नानुमितिविषयकसर्वजनीनानुव्यवसायसाक्षिकोऽनुमितित्वाख्यो जातिविशेषः; तदवच्छिन्नकरणतया चानुमानस्य प्रमाणान्तरत्वमव्याहतमेव। (५)।**

**अथानुमितित्वजातिसत्त्वेऽपि तद्व्यञ्जको विधेयताख्यः साध्यादि-**

---

(३) "पर्वतो वह्निमानित्याकारकप्रत्यक्षनिर्णयादेव" इति पूर्वं यदुक्तं तत्राक्षेपपूर्वकं तन्निरासेन पूर्वपक्षं स्थापयति "**नचे**"त्यादिना। "**साध्यादिभासकेति**"। अनुमितौ पक्ष-साध्यवैशिष्टयविषयकत्वनियामिका या साध्यादीनामुपस्थितिरूपा "**सामग्री**" तदात्मको-"**ज्ञानसन्निकर्षो**" ज्ञानलक्षणाख्यः सन्निकर्षविशेषः, तस्या"**वश्यकत्वाद्**" अवश्यं सत्त्वादित्यर्थः, तथा च तादृशप्रत्यक्षनिर्णयो निराबाध एवेति भावः।

(४) पूर्वपक्षनिरासाभिप्रायेणाह "**नचे**"त्यादि। अत्र "पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वा"दित्येवमितरभेदसाध्यकस्थले व्यतिरेकव्याप्तिघटितपरामर्शाकारं प्रदर्शितवतो ग्रन्थकारस्य पाठ आदर्शपुस्तके—"इतरव्यापकीभूते"ति दृश्यते, सच व्याप्तिपञ्चकप्रथम-लक्षणव्याख्यायां **मथुरानाथो**ल्लिखितं "प्रतियोग्यप्यन्योन्याभावाभाव" इति मतविशेषमादाय रक्षितुं योग्यः, अस्माभिस्तु—इतरत्वव्यापकीभूतेति पाठः साधीयान् मन्यते, अन्योन्याभावा-भावस्य प्रतियोगितावच्छेकस्वरूपतायाः सर्ववादिप्रसिद्धत्वात्। "**अप्रसिद्धसाध्यकेति**"। यादृश-परामर्शे साध्यतावच्छेदकरूपेण साध्यं विषयो न भवति तादृशपरामर्श एवाप्रसिद्धसाध्यक-परामर्शः, यथा अभावसाध्यकस्थले व्यतिरेकपरामर्शः। "**साध्यादिज्ञानानैयत्यादि**"ति। अत्रादिपदेन साध्यतावच्छेदकं बोध्यम्। तथा च तादृशाप्रसिद्धसाध्यकपरामर्शकाले नियमतः साध्यतावच्छेदकरूपेण साध्यज्ञानस्यासत्त्वादित्यर्थः, एतेन साध्यस्य प्रत्यक्षोपयोगी ज्ञान-लक्षणसन्निकर्षोऽपि तत्र नास्तीति सूचितम्, एवञ्च तादृशपरामर्शानन्तरमितरभेदरूपसाध्यस्य प्रत्यक्षं न सम्भवतीति बोध्यम्। "**प्रमित्यन्तरे**"ति। अनुमितिरूपप्रमितिविशेषेत्यर्थः। पुनः पूर्वपक्षमुत्थापयति "**तादृशपरामर्शदशाया**"मित्यादिना। "**इतरत्वघटकीभूते**"ति। इतरत्वं नाम भेदत्वावच्छिन्नवत्त्वम्। **तद्घटको** भेदत्वरूपसामान्यधर्मः।

(५) सिद्धान्तपथं प्रदर्शयति "इति चेन्न" इत्यादिना। "अनुमिनोमीत्याकारके"ति, उत्तरत्रानुव्यवसायेऽन्वेति।

**निष्ठविषयताविशेषोऽवश्यमुपगन्तव्यः। यदभावाद्वह्निमान् पर्वतो घटवानित्याकारकानुमित्यनन्तरं न वह्निमनुमिनोमीत्याकारकानुव्यवसायः। एवञ्चोक्तानुव्यवसायस्य तादृशविषयताविशेषविषयकत्वेनैवोपपत्तौ जातिविशेषावलम्बन(त्व) मेवासिद्धमिति चेन्मास्तु तादृशानुव्यवसायादेवानुमितित्वाख्यजातिविशेषसिद्धिः, तथापि तादृशविषयताविशेषनियामकतया लिङ्गपरामर्शादेर्हेतुताया आवश्यकत्वात् तस्य प्रमाणान्तरता निष्प्रत्यूहैव।(६)**

**वस्तुतस्तु तादृशानुव्यवसायस्य जातिविशेषालम्बनत्वोपगम आवश्यकः, अन्यथा विधेयत्वाख्यविषयताया आपत्त्यात्मकप्रत्यक्षशाब्दबोधादिसाधारणतया तदनन्तरमपि तादृशानुव्यवसायापत्तेः। नह्यनुमितावापत्तिशाब्दादिव्यावृत्तविषयताविशेषः। नचापत्त्यादिसाधारणविषयताविशेषस्यातिप्रसक्ततयाऽनुमितित्वव्यञ्जकत्वासम्भवेन तद्व्यावृत्तविषयताविशेषोऽनुमितित्वजातिमङ्गीकुर्वताऽवश्यमङ्गीकर्तव्य इति वाच्यं, व्यञ्जकातिप्रसक्तेरदोषतया आपत्त्यादिसाधारणविधेयताया अनुमितित्वव्यञ्जकत्वसम्भवादापत्त्यादौ व्यञ्जकसत्त्वेऽप्यनुमितित्वरूपविषयासत्त्वेन तादृशानुव्यवसायोत्पादासम्भवादिति।(७)**

---

(६) अनुमितित्वाख्यजातिविशेषं विनापि प्रकारान्तरेणैव "अनुमिनोमि" इत्याकारानुव्यवसायोपपत्तिसम्भवेन तादृशजातिविशेषावच्छिन्नकार्यतानिरूपितकरणतया अनुमानस्य प्रमाणान्तरत्वस्वीकारो न युक्त इत्याशंकते "**अथे**"त्यादिना। "**तद्व्यञ्जक**" इति। ज्ञाने अनुमितित्वभासक इत्यर्थः। "**साध्यादी**"ति। अत्रादिपदेनापाद्यादिपरिग्रहः, विधेयताया आपाद्यादिसाधारणत्वेऽपि यथा न कश्चिद्दोषः सम्भवेत् तथासमाधानमग्रे "वस्तुतस्तु"कल्पे मूलकारेणैव वक्ष्यते। "**वह्निमान् पर्वतोघटवानि**"त्यादि। अत्र वह्निमत्त्वपर्वतत्वोभयधर्मावच्छिन्नविशेष्यकघटविधेयकानुमितिरभिप्रेता, अत्र विधेयत्वं घटे, नतु वह्नौ। "**तादृशविषयताविशेषविषयकत्वेनैवे**"ति। विधेयताख्यविषयताविशेषविषयकत्वेनैवेत्यर्थः। अयमभिप्रायः—"वह्निमनुमिनोमी"त्यनुव्यवसायो वह्निविधेयकत्वेन ज्ञानं विषयीकरोति नतु वह्न्यनुमितित्वेनेति। इमां शङ्कां निरस्यति "**मास्तु**" इत्यादिना। "**तादृशविषयताविशेषनियामकतये**"ति। विधेयताख्यविषयताया आपत्त्यादौ सत्त्वादापत्त्याद्यनन्तरमपि "अनुमिनोमि" इत्यनुव्यवसायप्रसक्तिवारणायोक्ताकारानुव्यवसायविषयीभूतज्ञानीयविधेयताख्यविषयताविशेषस्य नियामकतयेत्यर्थः। "**लिङ्गपरामर्शादे**"रिति। हेतुधर्मिकसाध्यव्याप्तिनिश्चयादेरित्यर्थः; आदिपदेनाचार्यमतसिद्धं व्याप्यत्वेन निश्चीयमानं लिङ्गं बोध्यम्। लिङ्गपरामर्शशब्देन साध्यव्याप्यहेतुमान् पक्ष इति परामर्शस्य ग्रहणन्तु नात्र समीचीनं तस्य व्यापारवत्त्वाभावेनानुमितिकरणताया दुर्वचत्वात् "तस्य प्रमाणान्तरता निष्प्रत्यूहैव" इति मूलोक्तेरसङ्गत्यापत्तेः।

(७) अनुमिनोमीत्येवमनुव्यवसायस्यैवानुमितित्वजातिसाधकत्वमित्यभिप्रेत्य पुनः

**यत्तु परामर्शजन्यत्वं जन्यतासम्बन्धेन परामर्शवत्त्वमेव [वा] तादृशानुव्यवसायविषय इति नापत्तिशाब्दबोधाद्यनन्तरं तादृशानुव्यवसायापत्तिरित्यलमनुमितित्वजात्येति तन्न, अनुमितित्वजात्यभावे परामर्शानन्तरोत्पन्नापत्तिशाब्दबोधादिव्यावृत्तागुरुजन्यतावच्छेदकस्यैव निर्वक्तुमशक्यत्वादव्यवहितोत्तरत्वसम्बन्धेन परामर्शवत्त्वादेरेव तत् साधारण्यात् ।(८)। जन्यतावच्छेद-**

---

समाधत्ते "**वस्तुतस्तु**" इत्यादिना। "**जातिविशेषे**"ति। अनुमितित्वरूपजातिविशेषेत्यर्थः। "**नचे**"त्यादि। "**अतिप्रसक्ततया**" अनुमितिभिन्न आपत्त्यादौ वर्तमानतया। "**व्यञ्जकातिप्रसक्तेरदोषतये**"ति। ननु कथमदोषत्वमिति जिज्ञासायामाह—"**आपत्त्यादा**"वित्यादि, अयं भावः—व्यञ्जकत्वं नाम नावस्थितिप्रयोजकत्वमपितु वर्तमानस्यैव धर्मस्य ज्ञानविषयतानिर्वाहकत्वम्, एवञ्च आपत्त्यादौ व्यञ्जकीभूतविधेयतायाः सत्त्वेऽपि व्यङ्ग्यस्यानुमितित्वस्य तत्रासत्त्वान्न कोऽपि दोष इति।

"विधेयत्वाख्यविषयतया आपत्त्यात्मकप्रत्यक्षशाब्दबोधादिसाधारणतये"ति मूलकारेण यदभिहितं तत्रेदं चिन्त्यते—प्रत्यक्षानुमित्यादिस्वरूपविजातीयज्ञाननिरूपितविषयतानां निरूपकीभूतज्ञानभेदाद् भिन्नत्वमेव स्वीकर्तव्यम्, अन्यथा प्रत्यक्षमात्रविषये घटे प्रत्यक्षविषयतावानयमिति निश्चयस्येवानुमितिविषयतावानयमित्याकारस्यापि निश्चयस्य प्रमात्वं स्यात्, प्रत्यक्षविषयत्वानुमितिविषयत्वयोरभिन्नत्वे प्रत्यक्षविषयतावति घटे अनुमितिविषयतावत्त्वस्याप्यक्षततयोक्तनिश्चयस्याप्यनुमितिविषयतावति तादृशविषयताप्रकारकत्वात्। नच तत्र तादृशनिश्चयस्य प्रमात्वमिष्टतया ग्रहीतुं शक्यम्, अनुभवविरोधात्। तथाच ज्ञानभेदाद् विषयताया भेदस्यावश्यकत्वेन विषयताविशेषस्वरूपाया विधेयताया अपि निरूपकीभूतानुमित्यादिस्वरूपज्ञानभेदाद् विभिन्नरूपतैव, नतु सा आपत्त्यादिसाधारणी एका विधेयता। ननु तर्हि पूर्वकल्पीयरीत्या अनुव्यवसायबलादनुमितित्वजातिसिद्धेर्व्याहततया विधेयतानिरूपकीभूतज्ञानेषु मध्ये अनुमितेर्वैजात्यं कथमुपपद्येत इति चेन्न, "श्रोतव्यो मन्तव्य" इत्यादि श्रुतेरप्यनुमितित्वजातिसिद्धौ प्रमाणत्वात्। ननु तादृशश्रुतिबोधितं मननमपि विधेयताविशेषशालिज्ञानमेव न त्वनुमितित्वजात्यवच्छिन्नमिति निरुक्तश्रुतेः कथं तादृशजातिसाधकत्वमितिचेदत्रोच्यते तादृशजातिं विना विधेयताया वैशिष्ट्यस्यापि लघूपायेन दुरुपपादत्वादुक्तश्रुतेरनुमितित्वावच्छिन्नपरता स्वीकार्या।

(८) "**यत्तु**" इत्यादि, "**जन्यतासम्बन्धेने**"त्यादि, जन्यत्वस्य प्रकारविधया प्रवेशे तस्यापि सम्बन्धान्तरभानावश्यकतया गौरवं स्यादिति लाघावाभिप्रायेण सम्बन्धविधया जन्यत्वं प्रवेशितम्। "**तादृशानुव्यवसायविषय**" इति। "अनुमिनोमि" इत्याकारस्यानुव्यवसायस्य जन्यतासम्बन्धेन परामर्शवत्त्वावच्छिन्नविषयकत्वमेव, आपत्त्यादौ तादृक्परामर्शवत्त्वाभावादेव न तदुत्तरमनुमिनोमीत्याकारानुव्यवसायः स्यादिति यत्तुकल्पस्याभिप्रायः। उक्तकल्पं दूषयति "**तन्ने**"त्यादिना। अस्येदं तात्पर्यम्—जन्यतामात्रस्यैव किञ्चिद्धर्मावच्छिन्नत्वनियमात् परामर्शजन्यताया अपि कश्चिदवच्छेदकधर्मो वाच्यः,

**कस्य तत्साधारण्ये का क्षतिरिति चेन्न, तथा सति जन्यतावच्छेदकस्य जन्यतानतिप्रसङ्गसम्पादनाय जन्यताया अपि तत्रावश्यं स्वीकरणीयतया तदनन्तरं तादृशानुव्यवसायापत्तिस्तदवस्थैव, तस्मादनुमितित्वजातिः, तदवच्छिन्नकरणतया च लिङ्गज्ञानस्य प्रमाणान्तरता निष्प्रत्यूहैव।(९)।**

**अत्र वदन्ति चाक्षुषत्वादिवदनुमितित्वं प्रत्यक्षत्वव्याप्यजातिविशेष एव, नतु तद्विरुद्धमिति न तदवच्छिन्नकरणतया च तस्य प्रमाणान्तरता, प्रत्यक्षप्रमाण एवान्तर्भावात्।**

**नन्वनुमितौ प्रत्यक्षत्वसत्त्वे मानाभावः, अनुमित्यनन्तरं प्रत्यक्षत्वजात्यवलम्बिनः साक्षात्करोमीत्यनुव्यवसायस्य विरहादनुमानस्याप्यनुकूलतर्कविरहेणाप्रयोजकत्वात् कुतोऽनुमितित्वस्य प्रत्यक्षत्वव्याप्यजातित्वम्।(१०)।**

---

सिद्धान्ते तु स धर्मोऽनुमितित्वजातिरेव, अनुमितित्वजातिमस्वीकुर्वाणे निरुक्त"यत्तु"-मते अगत्या "अव्यवहितोत्तरत्वसम्बन्धेन परामर्शवत्त्वं" यदि तादृशजन्यताया अवच्छेदकमुच्यते तदा परामर्शानन्तरमुत्पद्यमानयोरापत्तिशाब्दबोधयोरपि तादृशजन्यतावच्छेदकधर्मसत्त्वेनानन्तरं मूले वक्ष्यमाणया रीत्या आपत्त्याद्यनन्तरमपि अनुमिनोमीत्यनुव्यवसायापत्ति स्तदवस्थैव स्यात्। यदि चापत्त्यादिभिन्नत्वविशिष्टं तादृशपरामर्शवत्त्वं जन्यतावच्छेदकमुच्यते तदा गौरवातिशयः स्यादेतदेवाह मूले "**परामर्शानन्तरोत्पन्नापत्तिशाब्दबोधादिव्यावृत्तागुरुजन्यतावच्छेदकस्यैव निर्वक्तुमशक्यत्वा**"दिति। नच परामर्शानन्तरं कथमापत्तिशाब्दबोधयोः सम्भव इति वाच्यं, यत आपत्तिस्थले आपाद्यबाधनिश्चयस्यावश्यकतयाऽनुमितौ च बाधनिश्चयस्य प्रतिबन्धकतयाऽऽपाद्यव्याप्यापादकवत्त्वनिश्चयात्मकपरामर्शोत्तरमापाद्यस्य नानुमितिरपि तु आपत्तिरेव जायते, सा चारोपात्मको मानसप्रत्यक्षविशेष एव, यत्र च "पर्वतो वह्निमान् वह्निव्याप्यधूमवांश्च" इत्येवं समूहालम्बनवाक्यार्थोपस्थित्यात्मकः सिद्ध्यात्मकपरामर्शस्तत्र सिद्धेः प्रतिबन्धकतया वह्नेर्नानुमितिरपि तु पर्वतो वह्निमदभिन्नो वह्निव्याप्यधूमवदभिन्नश्चेत्याकारः शाब्दबोध एव, तादृशयोरापत्तिशाब्दबोधयोरेव परामर्शानन्तरोत्पन्नत्वं बोध्यम्। "**परामर्शवत्त्वादेरेव**"। अत्र "एव"शब्दोऽप्यर्थे।

(९) "**जन्यतावच्छेदकस्ये**"ति। परामर्शजन्यतावच्छेदकस्य निरुक्तपरामर्शवत्त्वरूपस्येत्यर्थः। "**तत्साधारण्ये**" आपत्त्यादिवृत्तित्वे। "**जन्यतानतिप्रसङ्गसम्पादनाय**" जन्यत्वाभाववदवृत्तित्वनिर्वाहाय। नह्यतिप्रसक्तमवच्छेदकमिति नियमानुरोधादेतदुक्तम्। "**अनुमितित्वजातिरिति**" "निष्प्रत्यूहैव" इत्यग्रिमेणान्वेति। "**तदवच्छिन्नकरणतये**"ति। अनुमितित्वावच्छिन्नकार्यतानिरूपितकरणतयेत्यर्थः। "**लिङ्गज्ञानस्य**" हेतुधर्मिकव्याप्तिनिश्चयस्य।

(१०) पुनः पूर्वपक्षमुत्थापयति "**अत्र वदन्ती**"त्यादिना, सुगमम्। अनुमितित्वे प्रत्यक्षत्वव्याप्यतानिरासाभिप्रायेण सिद्धान्ती प्रत्यवतिष्ठते "**नन्वित्यादिना**"। "**मानाभाव**" इति। मानाभावं दर्शयति "**अनुमित्यनन्तरमि**"त्यादिना।

**यत्तु—अनुमितित्वस्य प्रत्यक्षत्वविरुद्धत्वेऽनुमितिसामग्रीकाले ज्ञान-सन्निकर्षादिघटितसामग्रीवशात् प्रत्यक्षापत्तिवारणाय प्रत्यक्षं प्रत्यनुमिति-सामग्रीप्रतिबन्धकत्वमावश्यकम्, अनुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वे च तदानी-मनुमित्यात्मकप्रत्यक्षस्यैवोत्पादेन तादृशप्रतिबध्यप्रतिबन्धकभावो न कल्प्यत-इत्येतादृशलाघवरूपानुकूलतर्कसत्त्वादनुमानमेवानुमितौ प्रत्यक्षत्वसाधकप्रमाण-मिति (११)। तन्न विचारसहम्। अनुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वे चाक्षुषत्वादिविरुद्धं तदवश्यं वाच्यम्, अनुमितिसामग्रीकाले लौकिकसन्निकर्षादि-घटितसामग्र्या अनावश्यकतया चाक्षुषत्वादिव्याप्यत्वासम्भवात् व्यापकतायाः सुदूरपराहतत्वात्। व्याप्यव्यापकभावविरहे संकरभयेन सामानाधिकरण्या-सम्भवात्। एवञ्चानुमितिसामग्रीकाले चाक्षुषादिवारणाय तत्र तस्याः प्रति-बन्धकत्वमुभयवादिसिद्धमेव, प्रत्यक्षत्वावच्छिन्नं प्रति तत्प्रतिबन्धकत्वकल्पनन्तु न कस्यापि, विशेषप्रतिबध्यप्रतिबन्धकभावेनैव निवेशोपपत्तेः, एवञ्च किम-कल्पनप्रयुक्तलाघवं व्याप्यत्वमते?।(१२)।**

**अथानुमितित्वस्य चाक्षुषत्वादिव्याप्यव्यापकभावानुपपत्तावपि मानसत्व-**

---

ननु मास्तु तथाविधानुव्यवसायात्मकं प्रमाणं तथापि "अनुमितिः प्रत्यक्षं सन्नि-कर्षानन्तरजन्यत्वा"दित्येवंरूपेणानुमानेनैव अनुमितौ प्रत्यक्षत्वं सेत्स्यतीत्याशङ्कायामाह "**अनुमानस्यापी**"त्यादि। "**अनुकूलतर्कविरहेणे**"ति। भवदीयो हेतुः प्रत्यक्षत्वरूप-साध्यस्य साधको नवा इत्येवमसाधकत्वशङ्काया निवृत्यनुकूलतर्काभावेनेत्यर्थः। "**अप्रयोजक-त्वाद्**" अनुमितौ प्रत्यक्षत्वासाधकत्वात्।

(११) निरुक्तासाधकत्वशङ्कानिवृत्तये लाघवरूपमनुकूलतर्कं दर्शयितुमाह "**यत्तु**" इत्यादि। "**ज्ञानसन्निकर्षादी**"ति। साध्योपस्थितिरूपज्ञानलक्षणसन्निकर्षघटितप्रत्यक्ष-सामग्र्या अपि तत्र सत्त्वेनानुमितिसामग्र्युत्तरं साध्यस्य प्रत्यक्षापत्तिः स्यात् तद्वारणाय इति भावः। "**लाघवरूपानुकूलतर्कसत्त्वादि**"ति। निरुक्तस्थलीयानुमितौ यदि प्रत्यक्षत्वं न स्यात्तदा प्रत्यक्षं प्रत्यनुमितिसामग्रीप्रतिबन्धकत्वाकल्पनरूपं लाघवं न स्यादित्येव-मनुकूलतर्कसत्त्वादित्यर्थः।

(१२) यत्तुमतं दूषयति "**तन्ने**"त्यादिना। अयं भावः— यया रीत्या प्रतिबध्य-प्रतिबन्धकभावाकल्पनरूपलाघवमभिप्रेत्य यत्तुकल्पीयपूर्वपक्षः समुत्थापितस्तया रीत्या लाघवाशा तु वृथैवेति। कथं वृथेति विस्तरेण विवृणोति "**अनुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वे**" इत्यादिना। व्याप्यत्व इत्यत्र भावे सप्तमी। तथाच तादृशव्याप्यत्वे स्वीकृतेऽपीत्यर्थः। "किमकल्पनप्रयुक्तलाघवं व्याप्यत्वमते" इत्युत्तरवाक्यार्थेन सह तदर्थस्य योजना।

उभयवादिसिद्धेन चाक्षुषत्वाद्यवच्छिन्नं प्रत्यनुमितिसामग्र्याः प्रतिबन्धकत्वेनै-वोपपत्तौ प्रत्यक्षत्वावच्छिन्नं प्रत्यनुमितिसामग्र्याः प्रतिबन्धकत्वकल्पना स्वत एव निष्प्रयो-

व्याप्यत्वमुपपद्यत एव, अनुमितिसामग्रीकाले ज्ञानप्रत्यासत्तिघटिताया मानससामग्र्या आवश्यकत्वादिति मानसत्वावच्छिन्नं प्रत्यनुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पनेन लाघवमक्षुण्णमेव (१३)। न च पर्वतो वह्निव्याप्यधूमवानित्येतादृशपरामर्शजन्यानुमितौ घटादिविषयताया अनुभवविरुद्धतया घटादिमानसे वह्न्याद्यनुमितिसामग्रीप्रतिबन्धकत्वमुभयवादिसिद्धमेव, वह्निमानित्याकारकमानसे सामग्र्याः प्रतिबन्धकत्वान्तरं विरुद्धमतेऽपि नास्ति, घटादिविषयकमानसस्थलीयप्रतिबध्यप्रतिबन्धकभावे विषयमनिवेश्य सर्वसाधारणमानसत्वस्य प्रतिबध्यतावच्छेदकत्वोपगमात् तत एवोपपत्तेरिति लाघवानवकाश इति वाच्यं, घटमानसं जायतामित्याद्याकारकेच्छानां विशिष्योत्तेजकत्वानुरोधेन घटादिमानसत्वादेः प्रतिबध्यतावच्छेदकताया आवश्यकतया घटादिमानसस्थलीयप्रतिबन्धकतया वह्निमानसादिवारणासम्भवेन पृथक् प्रतिबध्यप्रतिबन्धकभावकल्पनस्यावश्यकत्वाद् (१४) इति चेन्न, भिन्नविषयकचाक्षुषात्मकप्रत्यक्ष-

---

जनेति स्फुटीकर्तुमाह "**चाक्षुषत्वादिविरुद्धमित्या**"दि। विरुद्धत्वं प्रतिपादयति "**अनुमितिसामग्रीकाले**"इत्यादिना। "**लौकिकसन्निकर्षादिघटितसामग्र्याः**", चाक्षुषादिजनकचक्षुःसंयोगादिघटितसामग्र्याः। "**अनावश्यकतया**", नियमतः स्थितेरभावेन। तथाच यदा चाक्षुषादिसामग्रीविरहिताऽनुमितिसामग्री अनुमितिं जनयति तदानीन्तनानुमितौ कस्यापि मते चाक्षुषत्वादिकं नास्ति, अनुमितित्वं तु वर्तत एवेति व्याप्यत्वभङ्गः। यदा च परामर्शादिविरहवतो जनस्य चक्षुःसंयोगादिघटितसामग्र्या वह्नेः प्रत्यक्षमुत्पद्यते तदा तस्मिन् प्रत्यक्षेऽनुमितित्वाभावः सर्वमतसिद्धः, चाक्षुषत्वं तु निर्विवादमतोऽनुमितित्वे चाक्षुषत्वादिव्यापकतापि न सम्भवतीत्याह "**व्यापकतायाः सुदूरपराहतत्वा**"दिति।

नन्वस्तु तर्हि चाक्षुषत्वादिसमानाधिकरणमेव तदित्याशङ्कायामाह "**व्याप्यव्यापकभावविरहे**" इत्यादि। "**सङ्करभयेने**"ति। व्याप्यव्यापकभावानापन्नयोर्धर्मयोः सामानाधिकरण्ये सति तयोः परस्परं सांकर्यनियमादनुमितित्व-चाक्षुषत्वाद्योरपि व्याप्यव्यापकभावशून्ययोः कथञ्चित् सामानाधिकरण्ये स्वीकृते तयोः साङ्कर्यापत्त्या जातित्वं व्याहन्येत, अतोऽनुमितित्वे चाक्षुषत्वाद्यसमानाधिकरणत्वलक्षणविरुद्धत्वमेव पर्यवस्यतीति भावः। "**एवञ्च**" अनुमितित्व–चाक्षुषत्वाद्योर्विरुद्धत्वे च। "**तत्र**" चाक्षुषत्वाद्यवच्छिन्नं प्रति। "**तस्या**" अनुमितिसामग्र्याः। "**प्रतिबन्धकत्व**"मिति।

अत्रेदं बोध्यम्—भिन्नविषयकचाक्षुषत्वाद्यवच्छिन्नं प्रत्येव एतत् प्रतिबन्धकत्वमुभयवादिसिद्धम्, समानविषये तु प्रत्यक्षसामग्र्येवानुमितिं प्रतिबध्नाति। "**निवेशोपपत्तेः**" अनुमितिसामग्र्यनन्तरं प्रत्यक्षापत्तिवारणोपपत्तेरित्यर्थः।

(१३) पुनः पूर्वपक्षमुत्थापयति "**अथे**"त्यादिना, सुगमम्।

(१४) नचेति, वाच्यमिति परेणान्वयः। "**घटादिविषयिताया**" इति। "**अनुभव-**

**सामग्रीकाले मानससामग्र्यभावादनुमितिसामग्र्यास्तदानीमपि सत्त्वाद्, अनुमितित्वस्य मानसत्वव्याप्यताया अप्यसिद्धेस्तादृशचाक्षुषादिसामग्रीकाले मानससामग्र्या असत्त्वञ्च मानसं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकत्वात्, तदभावरूपकारणासत्त्वात् (१५)। न च मानसत्वावच्छिन्नं प्रति तादृशसामग्र्याः प्रतिबन्धकत्वकल्पनमेवासिद्धमिति वाच्यं तादृशप्रतिबन्धकत्वाकल्पने भिन्नविषयकचाक्षुषाद्युत्पत्तिकालेऽनुमित्यन्यमानसापत्तेः। नन्वेवमनुमित्यन्यमानसत्वस्यैव प्रतिबध्यतावच्छेकत्वमभ्युपगम्यते, अतस्तदानीं मानससामान्यसामग्र्या अक्षतेरिति वाच्यं, अनुमित्यन्यविरोधिनीनां तथाविधानन्तसामग्रीणां प्रतिबध्यतावच्छेदककोटावनुमित्यन्यत्वस्याधिकस्य निवेशे महागौरवाद्, अनुमित्यन्यमानसत्वस्य तादृशसामग्र्यभावजन्यतावच्छेदकत्वे लाघवमिति लाघवज्ञानकालेऽनुमित्यन्यमानसत्वावच्छिन्नापत्तिवारणाय तदवच्छिन्नं प्रत्यनुमितिसामग्र्याः प्रतिबन्धकताया अपि आवश्यकतयोपदर्शितलाघवासम्भवाच्च।(१६)।**

---

**विरुद्धतयेति**", भिन्नविषयेऽनुमितिसामग्र्या बलवत्त्वादिति भावः। "**सामग्र्याः**" अनुमितिसामग्र्याः "**विरुद्धमतेऽपि नास्ति**" इत्युक्तौ कथन्तानिवृत्तये आह "**घटादिविषयके**"-त्यादि, सुगमम्।

इदानीमुक्तं लाघवानवकाशवादं निराकुर्वन् पूर्वपक्षमेव स्थापयितुमाह—"**घटमानस**"मित्यादि। "**विशिष्योत्तेजकत्वानुरोधेने**"त्यादि। अयं भावः—यदा वह्न्यनुमितिसामग्रीदशायां घटमानसं मदिष्टसाधनमित्येवं ज्ञानं जातं ततश्च घटमानसं मे जायतामितीच्छा तदनन्तरं घटमानसमेव जायते नतु वह्न्यनुमितिः, इच्छाघटितसामग्र्याः प्रबलत्वात्। इत्थञ्च घटमानसत्वावच्छिन्नं प्रति घटमानसेच्छाविरहविशिष्टाया वह्न्याद्यनुमितिसामग्र्याः प्रतिबन्धकत्वमित्येवं रीत्या विशिष्यैव प्रतिबध्यतावच्छेदकत्वस्वीकारस्यावश्यकत्वमिति। "**पृथक् प्रतिबध्यप्रतिबन्धकभावकल्पनस्यावश्यकत्वा**"दिति। अत्रादर्शपुस्तके (मूले) यद्यपि "पृथगिति" पदं नास्ति तथापि सप्रयोजनतया तद्योजितम्। एतेन अथेत्यादि पूर्वपक्षग्रन्थोक्तं "**लाघवमक्षुण्णमेव**" इति स्मारितम्, तथाच अनुमितित्वे मानसत्वव्याप्यत्वशङ्का दृढीभूता।

(१५) तां शङ्कां निरसितुमाह '**इतिचेन्न**' इत्यादि। "**मानससामग्र्यभावा**"दिति। कथमभाव इति 'तादृशचाक्षुषादि" इत्यादिना ग्रन्थकृतैवानन्तरं स्फुटीकरिष्यते। "**अनुमितिसामग्र्यास्तदानीमपि सत्त्वात्**" इति। तथाच तादृशसामग्रीजन्यज्ञानेऽनुमितित्वं सर्ववादिसिद्धं, मानसत्वन्तु असिद्धमिति बोध्यम्। तदेवाह—"**मानसत्वव्याप्यताया अप्यसिद्धे**"रिति। "**तादृशचाक्षुषादी**"ति, लौकिकचाक्षुषादीत्यर्थः। "**चाक्षुषसामग्र्याः**" लौकिकचाक्षुषादि सामग्र्या इत्यर्थः।

(१६) **न चेत्यादि वाच्यमित्यन्तं** सुगमम्। "**तादृशप्रतिबन्धकत्वाकल्पने**" मान-

**यत्तु अनुमितित्वस्य मानसत्वव्याप्यत्वमते अनुमिति-मानसोभयविरोधिनीनां समानविषयकलौकिकप्रत्यक्षशाब्दबोधादिसामग्रीणां प्रतिबध्यतावच्छेदकमुभय-साधारणं मानसत्वव्याप्यत्वमेवेति, विरुद्धत्वमते चानुमितित्वं मानसत्वञ्च द्वयमिति व्याप्यत्वमते लाघवमक्षुण्णमेवेति। तदपि न, अनुमितित्वप्रकारकेच्छा-मानसत्वप्रकारकेच्छयोः पृथक् पृथगुत्तेजकत्वानुरोधेन व्याप्यत्वमतेऽपि प्रतिबध्य-प्रतिबन्धकभावद्वयस्यावश्यकत्वात्। एकत्र निवेशेन एकमात्रप्रतिबन्धकत्वकल्पने अनुमितित्वप्रकारकेच्छाकालेऽसत्याञ्चानुमितिसामग्र्यां सत्याञ्च विरोधि-सामग्र्यामनुमित्यन्यमानसापत्तेः, अनुमित्सायाश्चानुमितिसामग्रीविशिष्टाया उत्तेजकत्वे महागौरवात्।(१७)।**

---

सत्वावच्छिन्नं प्रति लौकिकचाक्षुषादिसामग्र्याः प्रतिबन्धकत्वाकल्पने। "**भिन्नविषयक-चाक्षुषाद्युत्पत्तिकाले**" इति। यत्र प्रथमक्षणे वह्नेरुपस्थितिरूपमानससामग्री घटस्य च चक्षुःसंयोगादिरूपलौकिकप्रत्यक्षसामग्री युगपत् संघटिता ततो द्वितीयक्षणे घटस्य चाक्षुषं जायते तत्र तादृशचाक्षुषाद्युत्पत्तिकाले इत्यर्थः। **अनुमित्यन्यमानसापत्तेरिति,** तत्र वह्नेरनुमितिसामग्र्या असत्त्वात् पूर्वपक्षाभिमतस्यानुमित्यात्मकमानसस्यासम्भवादाह— "**अनुमित्यन्ये**"ति। अनुमितिसामग्र्यास्तदानीं संघटने तु घटचाक्षुषमवधूय वह्नेरनुमितिरेव स्यात्। भिन्नविषये अनुमितिसामग्र्या बलवत्त्वादिति बोध्यम्। "**न चैव**"मित्यादि। अत्र "**एव**" मित्यस्यानुमित्यन्यमानसस्यैवानुत्पाद्यत्वे इत्यर्थः, "**तदानीं**" तादृशभिन्न-विषयकचाक्षुषादिसामग्रीकाले, "**अनुमित्यन्यविरोधिनीनाम्**" अनुमित्यन्यानि यानि मानस-ज्ञानानि तेषां विरोधिनीनां प्रतिबन्धिकानाम्। "**तथाविधानन्तसामग्रीणाम्**"। चाक्षुष-स्पार्शनादिनानाविधलौकिकप्रत्यक्षसामग्रीणाम्। **महागौरवादिति।** नन्वस्तु तादृशसामग्री-प्रतिबध्यतावच्छेदककोटौ महागौरवभिया केवलं मानसत्वमेव तथा। तथाप्यनुमितित्वस्य मानसत्वव्याप्यत्वमते मानसत्वावच्छिन्नं प्रत्यनुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पननिबन्धनं प्रागुक्तं लाघवमक्षुण्णमेवेत्याशङ्कायामाह—"**अनुमित्यन्यमानसत्वस्ये**"त्यादि। "**लाघव-ज्ञानकाले**" अनुमितिसामग्रीसत्त्वे इति पूरणीयम्। अन्यत् सुगमम्।

(१७) व्याप्यत्वमते पुनर्लाघवमाशङ्कते "**यत्त्वि**"त्यादिना, तन्मतं निरस्यति "**तदपि न**" इत्यादिना। "**पृथक् पृथगुत्तेजकत्वानुरोधेने**"ति। अनुमितिं प्रत्यनुमितित्व-प्रकारकेच्छाविरहविशिष्टायाः समानविषयकविरोधिसामग्र्याः प्रतिबन्धकत्वदलेऽनुमित्-सायामेकमुत्तेजकत्वम्, मानसत्वावच्छिन्नं प्रति मानसत्वप्रकारकेच्छाविरहविशिष्टाया-स्तादृशविरोधिसामग्र्याः प्रतिबन्धकत्वदले तु मानसेच्छायामपरमुत्तेजकत्वमितिरीत्या पृथगुत्ते-जकत्वकल्पनाया आवश्यकत्वेनेत्यर्थः।

नन्वनुमितित्वप्रकारकेच्छाविरहविशिष्टा सती मानसत्वप्रकारकेच्छाविरहविशिष्टा या विरोधिसामग्री सैव मानसत्वव्याप्यत्वावच्छिन्नं प्रति प्रतिबन्धिकेत्येवंरीत्या एकमात्रप्रति-

**परन्तु व्याप्यत्वमते मानसत्वप्रकारेच्छाविरहविशिष्टतादृशसामग्र्यभावस्य जन्यतावच्छेदकमनुमित्यन्यमानसत्वं वाच्यं, मानसत्वमात्रस्य तथात्वेऽनुमितित्वप्रकारकेच्छाधीनानुमितौ व्यभिचारादिति विपरीतगौरवम्।(१८)।**

**अथ सर्वत्रैवानुमित्यन्यमानसे ज्ञानादिभानमावश्यकम्, उपनायकज्ञानादेर्मानसपूर्वमावश्यकत्वाद्, विषयसत्त्वे च ज्ञानादिभानेऽधिककालानपेक्षणात्, इत्थञ्च निखिलमेवानुमित्यन्यमानसं ज्ञानाद्यंशे विषयितासम्बन्धेन वह्न्यादिविशेषणकं भविष्यतीति ज्ञानादिलौकिकविषयितानिरूपितवह्न्यादिविषयताशालिमानसत्वाद्यवच्छिन्नं प्रति तादृशविषयिताप्रकारकमानसेच्छाविरहविशिष्टविरोधिसामग्रीप्रतिबन्धकतयैवोपपत्तौ ज्ञानादिलौकिकविषयतामनिवेश्य पर्वतो वह्निमानित्यादिमानसे विरोधिसामग्र्याः प्रतिबन्धकत्वमेव नास्तीति कीदृशप्रतिबध्यतावच्छेदककोटावनुमित्यन्यत्वनिवेशाधिक्यम्, उक्तप्रतिबध्यप्रतिबन्धकभावे ज्ञानादिलौकिकविषयताया निवेशादेवानुमितौ व्यभिचाराभावात्। (१९)।**

---

वन्धकत्वकल्पने का क्षतिरित्याशङ्कायामाह "**एकत्रनिवेशेन**" इत्यादि, एकत्र द्वयमितिरीत्या निरुक्तेच्छाविरहद्वयस्य विरोधिसामग्रीविशेषणतया निवेशेन इत्यर्थः।

"**अनुमित्यन्यमानसापत्ते**"रिति, इष्टापत्तिस्तु न सम्भवति, अनुमित्यन्यमानसस्यानुमित्साविषयसिद्ध्यनुपयोगित्वात्। अथ तादृशापत्तिवारणायानुमितिसामग्रीविशिष्टाया एवानुमित्साया उत्तेजकत्वं कल्प्यमित्याशङ्कायामाह **अनुमित्सायाश्चे**त्यादि।

(१८) व्याप्यत्वमते दोषान्तरमाह "**परन्तु**" इत्यादिना। "**अनुमितित्वप्रकारकेच्छाधीनानुमित्तौ**" इति, यत्र समाने विषये लौकिकप्रत्यक्षसामग्रीकाले अनुमितिसामग्री सम्भूता ततश्चानुमित्सया याऽनुमितिरुत्पद्यते तस्यामित्यर्थः। **व्यभिचारादिति**। साप्यनुमिति र्भवन्मते मानसं ज्ञानम्, किन्तु तदव्यवहितपूर्वक्षणे मानसत्वप्रकारकेच्छाविरहादुत्तेजकीभूतेच्छाविरहविशिष्टविरोधिसामग्र्येवास्ति, नतु तादृशसामग्र्यभावरूपं मानसकारणमिति कारणासत्त्वेऽपि कार्यस्वीकारे व्यतिरेकव्यभिचारात्, अतोऽनुमित्यन्यमानसत्वमेवागत्या तादृशसामग्र्यभावजन्यतावच्छेदकं वाच्यमिति "**विपरीतगौरवं**" जन्यतावच्छेदकदलेऽपि गौरवमिति भावः।

(१९) व्याप्यत्ववादी पुनः प्रत्यवतिष्ठते—"**अथे**"त्यादिना, "**अनुमित्यन्यमानसे**" अनुमित्यनात्मके बहिर्वस्तुविषयकमानसज्ञाने इत्यर्थः। सुखादिस्वरूपान्तरविषयके "अहं सुखी" इत्याद्याकारकमानसे ज्ञानादिभानस्याभावात्। **ज्ञानादीत्य**त्रादिपदेन इच्छा-कृति-द्वेषाणां परिग्रहः, "**उपनायकज्ञानादे**"रिति, उपनायकः बहिर्वस्तूनां मानसज्ञानविषयतासम्पादको यो ज्ञानादिः ज्ञानेच्छाकृतिद्वेषाणामन्यतमस्तस्येत्यर्थः। ननु मानसपूर्वं ज्ञानादेः सत्त्वेऽपि प्रथमतस्तादृशज्ञानादिविनाकृतं तद्विषयविषयकमेव मानसमस्तु इत्याशङ्कायामाह—"**विषयसत्त्वे च**" इत्यादि, विषयस्य उपनायकीभूतज्ञानाद्यन्यत-

**न च वह्न्यादिमानसत्वावच्छिन्नं प्रति वह्न्यादिविषयित्वप्रकारकमानसेच्छाविरहविशिष्टविरोधिसामग्रीत्वादिना प्रतिबन्धकत्वकल्पनेनाप्युपपत्तेः ज्ञानादिलौकिकविषयतां निवेश्य उपदर्शितप्रतिबध्यप्रतिबन्धकभाव एवासिद्ध इति वाच्यम् इच्छानिष्ठलौकिकविषयतानिरूपितवह्निविषयताशालि मानसं जायतामित्याकारकेच्छाकाले तादृशविषयताशालिमानससामग्र्यसत्त्वे सत्याञ्च विरोधिसामग्र्यां वह्निमहं जानामीत्येतादृशमानसवारणाय विशेषरूपेणोपदर्शितेच्छाद्युत्तेजकीकृत्य ज्ञानादिलौकिकविषयित्वञ्च प्रतिबध्यतावच्छेदककोटौ निवेश्य प्रतिबन्धकताकल्पनस्यावश्यकत्वात् । (२०)।**

---

मस्य सत्त्वे तादृशमानसपूर्वमावश्यकतया विद्यमानत्व इत्यर्थः। "**इत्थञ्च**" ज्ञानादिभानस्यावश्यकत्वे च। "**वह्न्यादिविशेषणक**"मिति, "वह्निं जानामि" "घटं जानामि" इत्येवं प्रकारकम्। "**ज्ञानादिलौकिकविषयितानिरूपिते**"ति ज्ञानादिनिष्ठा या लौकिकविषयिता तन्निरूपितेत्यर्थः। "**मानसत्वाद्यवच्छिन्नमिति**"—अत्र "आदि" पदं निष्प्रयोजनं बोध्यम्। "**तादृशविषयिताप्रकारकमानसेच्छाविरहे**"ति। ज्ञानादिनिष्ठलौकिकविषयितानिरूपितवह्न्यादिविषयताकं मानसं मे जायतामित्याकारमानसांशे तादृशवह्न्यादिविषयताकत्वप्रकारिका या इच्छा तद्विरहेत्यर्थः। "**ज्ञानादिलौकिकविषयतामनिवेश्य**" इति। प्रतिबध्यतावच्छेदककुक्षावित्यादौ पूरणीयम्। "**कीदृशप्रतिबध्यतावच्छेदकोटा**"वित्यादि। अयं भावः—यादृशप्रतिबन्धकस्य प्रतिबध्यतावच्छेदको यो धर्मस्तादृशप्रतिबन्धकाभावस्य जन्यतावच्छेदकोऽपि स एव धर्म इति नियमः, तथाचास्मत्प्रदर्शितप्रतिबध्यप्रतिबन्धकभावे ज्ञानादिलौकिकविषयिताघटितवह्न्यादिमानसत्वमेव प्रतिबध्यतावच्छेदकमतो विरोधिसामग्र्यभावजन्यतावच्छेदकमपि तादृशमानसत्वमेव, एवञ्च पर्वतो वह्निमानित्याकारानुमित्यात्मकमानसस्य न तादृशविरोधिसामग्र्याः प्रतिबध्यतावच्छेदकधर्माक्रान्तत्वं नापि तादृशविरोधिसामग्र्यभावस्य जन्यतावच्छेदकधर्मवत्त्वम्, ज्ञानादिलौकिकविषयितायास्तत्राभानात्।

नन्वेवं जन्यतावच्छेदकदले अनुमित्यन्यत्वानिवेशे "**परन्तु**" कल्पे प्रदर्शितस्यानुमित्साधीनानुमितौ व्यभिचारस्य कथं वारणं स्यादित्याशङ्कायामाह—"**उक्तप्रतिबध्यप्रतिबन्धकभावे**" इत्यादि, तथाच बाधकाभावात्तादृशानुमितावपि मानसत्वाङ्गीकारान्न व्यभिचार इति बोध्यम्।

(२०) "**न चे**"त्यादि "**वाच्य**"मित्यन्तं सुगमम्। "**तादृशविषयताशालिमानससामग्र्यसत्त्वे**" इति, वह्नीच्छाविषयकमानसं प्रति वह्नीच्छायाः तादृशेच्छारूपविशेषणज्ञानस्य च सामग्रीरूपत्वं तयोरसत्त्वे इत्यर्थः। वह्निज्ञानदशायामिति पूरणीयम्। अन्यादृशेच्छासत्त्वेन "वह्निमहं जानामि" इत्येवं मानसस्य तत्रानुभवविरुद्धतया तद्वारणायैव ज्ञानादिलौकिकविषयिताघटितप्रागुक्तप्रतिबध्यप्रतिबन्धकभावकल्पनस्यावश्यकतां दर्शयति—"**वह्निमहं जानामी**"त्यादिना।

ज्ञानं न वह्नीयमित्याकारकविषयितासम्बन्धावच्छिन्नप्रतियोगिताकवह्नच-भावावगाहिबाधबुद्ध्यादिदशायां विषयितया ज्ञानाद्यंशे वह्नचादिभानासम्भवात् तत्रैव ज्ञानादिलौकिकविषयितानिरूपितवह्नचादिविषयिताशून्यमानसं सिद्धमिति तदनुरोधेन कल्पनीयप्रतिबध्यप्रतिबन्धकभाव एवानुमित्यन्यत्वं निवेशनीयमिति तु नाशङ्कनीयं, यतस्तत्र ज्ञानांशे वह्निभानासम्भवेऽपि वह्नचभावादिभाने बाधका-भावेन ज्ञानीयलौकिकविषयतानिरूपितवह्नचभावादिविषयिताशालिस्वरूपतादृश-मानसस्य तादृशवह्नचभावादिविषयिताप्रकारकमानसेच्छाविरहविशिष्टविरोधि-सामग्र्याः प्रतिबध्यतावच्छेदकाक्रान्ततया लौकिकविषयतामनिवेश्य प्रतिबध्य-प्रतिबन्धकभावकल्पनं विनैवोपपत्तेः। (२१)।

यत्तु वह्निविषयताशालिमानसं जायतामित्येतादृशेच्छाकाले विरोधि-सामग्रीसत्त्वे ज्ञानाद्यविषयकस्य वह्नचादिमानसस्य प्रसिद्धिस्तत्र ज्ञानादिलौकिक-विषयितानिरूपितवह्नचादिविषयिताप्रकारकमानसेच्छाविरहेण ज्ञानादिभानस्या-सम्भवादिति, तदपि न, तथापि तादृशेच्छानां ज्ञानादिलौकिकविषयिता-निरूपितत्वावच्छिन्नवह्नचादिविषयित्वप्रकारकेच्छात्वेन नोत्तेजकता, ज्ञानीय-लौकिकविषयितानिरूपितवह्निविषयिताशालि इच्छावृत्तिलौकिकविषयितानिरू-पितवह्निविषयितावन्मानसं जायतामित्येतादृशेच्छाया अवारणात्, किन्तु ज्ञाने-

---

(२१) ननु तथापि स्थलविशेषानुरोधेन प्रतिबध्यदले अनुमित्यन्यत्वनिवेश आवश्यक इत्याशङ्कते "**ज्ञानं न वह्नीय**"मित्यादिना, "**ज्ञानादिलौकिकविषयितानिरूपितवह्नचादि-विषयिताशून्यमानसं सिद्धमिति**"। अस्यायमभिप्रायः—पूर्वं वह्निज्ञाने सत्यपि उक्त-बाधनिश्चयरूपप्रतिबन्धकवशादनुव्यवसायात्मकमानसे वह्निविशेषितज्ञानभानं न सम्भवतीति तत्र केवलं जानामीत्याकारं ज्ञानविषयकं मानसं स्यात्, "**तदनुरोधेनेति**"। विरोधि-सामग्रीकाले वह्निव्याप्यवत्त्वपरामर्शसत्त्वे च मानसत्वप्रकारकेच्छया तादृशज्ञानमानसोपपत्तये इत्यर्थः। "**कल्पनीये**"त्यादि; अनुमित्यन्यमानसत्वावच्छिन्नं प्रति मानसत्वप्रकारकेच्छाविरह-विशिष्टैव विरोधिसामग्री प्रतिबन्धिका वाच्या, प्रतिबध्यतावच्छेदककोटावनुमित्यन्यत्वानिवेशे तदा वह्नचनुमितेर्वारणमशक्यं स्यात्, तदेवाह—"**अनुमित्यन्यत्वं निवेशनीय**"मिति। उक्तशङ्कां निरस्यति "**इति तु नाशङ्कनीयमि**"त्यादिना।

"**तत्र**" ज्ञानं न वह्नीयमिति बाधनिश्चयकाले, "**बाधकाभावेन**" इति, तथा च तत्र केवलं ज्ञानविषयकं मानसं न सिध्यति अपितु वह्नचभावज्ञानमानसमिति बोध्यम्। "**तादृश-मानसस्य**" वह्नचभावं जानामि इत्याकारस्य वह्नचभावज्ञानमानसस्य, "**तादृशवह्नचभावादि-विषयिते**"ति, ज्ञानीयलौकिकविषयितानिरूपितवह्नचभावादिविषयितेत्यर्थः। "**प्रतिबध्यता-वच्छेदकाक्रान्ततया**" उत्तेजकीभूतेच्छायामसत्यामिति यावत्, "**उपपत्ते**"रिति," विरोधि-सामग्रीकाले प्रागुक्तवह्नचभावज्ञानमानसवारणस्योपपत्तेरित्यर्थः।

**तरलौकिकविषयितानिरूपितत्वानवच्छिन्नवह्निविषयित्वप्रकारतानिरूपितमानस-निष्ठविशेष्यताकेच्छात्वेन, तस्याश्च वह्निविषयकं मानसं जायतामित्येतादृशेच्छा-साधारण्यमपीति तद्बलादपि ज्ञानादिभानसम्भवात् ।(२२)।**

**यत्तु सुषुप्त्यनन्तरं यत्र विनश्यदवस्थसन्निकर्षाद्वह्न्यादिनिर्विकल्पकं ततस्तन्मूलकवह्न्याद्युपनीतभाने ज्ञानभानासम्भवः, योग्यज्ञानादीनां प्रागसत्त्वात्, निर्विकल्पकस्यातीन्द्रियत्वादिति तदपि न, तदानीमुपनीतभानस्याप्रामाणिकत्वात् । न च निर्विकल्पकस्योपनायकत्वमते उपनायकज्ञानघटितसामग्र्येव प्रमाणम् तत्रास्तीतिवाच्यं ज्ञानाद्यविषयकमानसानुपगमे ज्ञानादिभासकसामग्र्या अपि तत् सामग्रीघटकतया तदभावेन सामग्र्या एवासिद्धेः ।(२३)।**

---

(२२) ज्ञानादिलौकिकविषयितामनिवेश्य प्रतिबध्यप्रतिबन्धकभावान्तरमपि कल्प्य-मित्याशङ्कते "**यत्त्वि**"त्यादिना, "**इत्येतादृशेच्छाकाले**" इत्यनन्तरं वह्न्युपस्थितिदशाया-मित्युह्यम्, "**विरोधिसामग्रीसत्त्वे**" समानविषयकलौकिकप्रत्यक्षादिसामग्रीसत्त्वे "**असम्भवा**"-दिति, तथाच तत्र ज्ञानादिलौकिकविषयितामनन्तर्भाव्य वह्न्यादिमानसत्वावच्छिन्नं प्रति तादृशमानसेच्छाविरहविशिष्टविरोधिसामग्र्याः प्रतिबन्धकत्वं कल्प्यम्, अन्यथा वह्निमानसे-च्छाविरहेऽपि तत्र वह्निमानसं वारयितुमशक्यं स्यात्, ज्ञानादिलौकिकविषयिताघटितनिरुक्त-प्रतिबध्यतावच्छेदकरूपानाक्रान्तत्वादिति शङ्काग्रन्थतात्पर्यम् । यत्तु मतं खण्डयति "**तदपि न**" इत्यादिना, "**तथापि**" इति, ज्ञानादिलौकिकविषयितानिरूपितवह्निविषयिताशालिमानसं जायतामित्याकारकेच्छायास्तत्रासत्त्वेऽपीत्यर्थः; अस्य च "**ज्ञानादिभानसम्भवात्**" इत्यग्रेण योजना । "**नोत्तेजकता**" इत्यत्र कथमिति जिज्ञासायामुत्तरमाह "**ज्ञानीये**"त्यादिना "**अवारणात्**" इत्यन्तेन । अयं भावः—ज्ञानीयलौकिकविषयिताघटितायाः प्रागुक्ताया उत्तेजकताया एतादृशेच्छायामपि सत्त्वेन विरोधिसामग्रीसत्त्वेऽपि एतादृशेच्छाबलात् "वह्नि-ज्ञानवानहम्" इत्याकारमानसमापद्येत । तत्तु तत्र नेष्टं, उक्तेच्छाया विषयसिद्धेस्तेन मानसेनाजननात् । तर्हि केन रूपेण उत्तेजकतेति निष्कृष्य विवृणोति "**किन्तु**" इत्यादिना "**मानसनिष्ठविशेष्यताकेच्छात्वेन**" इत्यन्तेन ग्रन्थेन । "**तस्याश्च**" अनया रीत्या निर्वाचिताया उत्तेजकतायाश्च, "**तद्बलादपि**" वह्निविषयकमानसं जायतामितीच्छारूपोत्तेजकबलादपि, "**ज्ञानादिभानसम्भवादि**"ति । ज्ञानीयलौकिकविषयितानिरूपितवह्न्यादिविषयिताशालिमानसं प्रति प्रतिबन्धकीभूताया उत्तेजकीभूततादृशेच्छाविरहविशिष्टविरोधिसामग्र्या असत्त्वेन तदानीन्तनमानसे ज्ञानभानस्य निराबाधत्वादित्यर्थः । तथाच पूर्ववर्तियत्तुकल्पे ज्ञानाद्य-विषयकस्य वह्निमानसस्य प्रसिद्धिरिति यदुक्तं तदकिञ्चित्करमिति भावः ।

(२३) **यत्त्वि**त्यादि, "**सुषुप्त्यनन्तरम्**" इति, एतेन निर्विकल्पकात् प्राक् योग्यज्ञानस्य योग्यज्ञानजनकसामग्र्याश्चासत्त्वं प्रतिपादितम् । **विनश्यदवस्थेति,** अव्यवहितोत्तरक्षण एव यस्य विनाशः स्यात् सः विनश्यदवस्थः, विनश्यन्ती अवस्था यस्येति व्युत्पत्तेः, विनश्य-

**वस्तुतस्तु तत्र वह्न्याद्युपनीतभानोपगमे क्षतिविरहः। तथाहि तत्र विशेष्यतावच्छेदकप्रकारकज्ञानविरहेण निर्धर्मितावच्छेदकमेव वह्न्यादिमानसं भविष्यतीति तत्स्थलीयप्रतिबध्यप्रतिबन्धकभावे च निर्धर्मितावच्छेदकत्वं प्रतिबध्यतावच्छेदककोटौ अवश्यं निवेशनीयम्, अन्यथा पर्वतत्वावच्छिन्नविशेष्यकमानसं जायतामित्याकारकेच्छाधीनमानसे व्यभिचारात् तादृशेच्छासत्त्वे पर्वतत्वावच्छिन्नविशेष्यकज्ञानजनकीभूतपर्वतत्वादिप्रकारकज्ञानासत्त्वे विरोधिसामग्रीदशायां निर्धर्मितावच्छेदककमानसवारणाय निर्धर्मितावच्छेदककमानसस्थलीयप्रतिबन्धकतायां तादृशेच्छाव्यावृत्तरूपेणैव तादृशेच्छाया उत्तेजकत्वस्योपगन्तव्यत्वात्। (२४)।**

---

दवस्थत्वञ्च स्वप्रतियोगित्वं स्वाव्यवहितपूर्ववर्तित्वञ्चेत्युभयसम्बन्धेन ध्वंसविशिष्टत्वमिति बोध्यम्। सन्निकर्षे विनश्यदवस्थेतिविशेषणेन निर्विकल्पकज्ञानोत्पत्तिकाले तस्यासत्त्वप्रतिपादनात् निर्विकल्पकाव्यवहितोत्तरक्षणेऽपि योग्यज्ञानोत्पत्त्यसम्भव इति सूचितम् "**वह्न्याद्युपनीतभाने**" इति "वह्निः" इत्याकारे "वह्निमान्" इत्याकारे वा लौकिकमानसज्ञाने। अन्यत् सुगमम्।

(२४) मूले अष्टादशसङ्ख्याङ्कितग्रन्थभागात् परम् अथेत्यादिना सन्दर्भेन व्याप्यत्ववादी यादृशं पूर्वपक्षमुपक्रान्तवान् तादृशस्यैव पूर्वपक्षस्य दृढतया स्थापनायाह "**वस्तुतस्तु**" इत्यादि। "**तत्र**" इति, यत्तु कल्पे सुषुप्त्यनन्तरमित्यादिना प्रदर्शितस्थले। "**क्षतिविरह**" इति, कथं क्षतिविरह इति स्वयमेव युक्त्या प्रतिपादयति **तथाहीत्यादिना**, "**तत्र**" प्रागुक्ततादृशस्थले, "**तत्स्थलीयप्रतिबध्यप्रतिबन्धकभावे च**" इति, निर्धर्मितावच्छेदककवह्न्यादिमानसं प्रति निर्धर्मितावच्छेदकवह्न्यादिमानसेच्छाविरहविशिष्टा विरोधिसामग्री प्रतिबन्धिकेति रीत्या निर्वचनीयप्रतिबध्यप्रतिबन्धकभावे इत्यर्थः। प्रतिबध्यदले निर्धर्मितावच्छेदकत्वानुपादाने दोषमाह **अन्यथेत्यादिना**, "**व्यभिचारात्**" इति,। अयं भावः—विरोधिसामग्रीदशायां यत्र पर्वतत्वप्रकारकज्ञानं ततश्च पर्वतत्वावच्छिन्नविशेष्यकवह्निमानसं जायतामितीच्छया "पर्वतो वह्निमान्" इति मानसं जायते तत्र तादृशमानसाव्यवहितपूर्वक्षणे निर्धर्मितावच्छेदककमानसेच्छाविरहविशिष्टविरोधिसामग्रीरूपप्रतिबन्धकसत्त्वेन तदभावरूपं कारणं न वर्तते इति व्यतिरेकव्यभिचारः स्यात्। ननु तत्र विरोधिसामग्रीरूपप्रतिबन्धकदले इच्छाया उत्तेजकत्वं यदि निर्धर्मितावच्छेदकत्वमनन्तर्भाव्य वह्न्यादिमानसेच्छात्वेन कल्प्यते तदा नोक्तव्यभिचारः सम्भवति, प्रागुक्तसधर्मितावच्छेदककवह्निमानसेच्छाया अपि तेन रूपेण उत्तेजकत्वात्, तथाच तत्रोत्तेजकीभूतेच्छाविरहविशिष्टा विरोधिसामग्री नास्तीति प्रतिबन्धकाभावरूपकारणस्याप्यक्षतत्वादित्याशङ्कायामाह "**तादृशेच्छासत्त्वे**" इत्यादि। पर्वतत्वावच्छिन्नविशेष्यकवह्न्यादिमानसेच्छासत्त्वे इत्यर्थः। "**तादृशेच्छाव्यावृत्तरूपेणैव**" इति। सधर्मितावच्छेदककवह्न्यादिमानसेच्छायामवृत्तिधर्मेण

**तथाचानुमितौ धर्मितावच्छेदकभानस्यावश्यकतया व्यभिचाराभावेन तदनुरोधान्नानुमित्यन्यत्वनिवेशनं, सधर्मितावच्छेदकमानसे च तज्जनकीभूत-धर्मितावच्छेदकप्रकारकयोग्यज्ञानस्य प्रागवश्यं सत्त्वेन ज्ञानादिभानावश्यकतया तत्र ज्ञानादिलौकिकविषयितामनिवेश्य प्रतिबध्यप्रतिबन्धकभावकल्पनमेव नास्तीति चेदस्त्येव एतादृशरीत्याऽनुमित्यन्यत्वनिवेशप्रयुक्तगौरवपरीहारः, तावतापि व्याप्यत्वमतं निर्युक्तिकमेव लाघवविरहाद्, अनुमितिसामग्रीकाले ज्ञानादिलौकिकविषयताशालिवह्न्यादिमानसवारणाय तादृशमानसेऽनुमिति-सामग्रीप्रतिबन्धकताया उभयवादिसिद्धत्वात्, ज्ञानादिलौकिकविषयतामनिवेश्य विरुद्धवादिनाऽपि प्रतिबन्धकान्तराकल्पनात्, तन्मते ज्ञानाद्यविषयकमानसाद्यनु-पगमे क्षतिविरहात्।(२५)।**

---

निर्धर्मितावच्छेदककवह्न्यादिमानसेच्छात्वेनैवेति यावत्। "**उत्तेजकत्वस्योपगन्तव्यत्वात्**"इति। एवञ्च प्रागुक्तव्यभिचारभयेन प्रतिबध्यदले निर्धर्मितावच्छेदकत्वनिवेशः सुस्थित एव।

(२५) अनुमितित्वे मानसत्वव्याप्यताप्रतिपादनप्रयासिनां पूर्वपक्षवादिनामुपरि विरोधिसामग्रीप्रतिबध्यतावच्छेदककोटावनुमित्यन्यत्वनिवेशनिबन्धनगौरवदोषः सिद्धान्तिभिः प्राक् प्रदर्शितः, सोऽपीदानीं निरस्त एव इत्याह "**तथाचेत्या**"दिना "**कल्पनमेव नास्ति**" इत्यन्तेन ग्रन्थेन। तत्र "तथाचे"त्यस्य प्रागुक्तप्रतिबध्यप्रतिबन्धकभावे प्रतिबध्यदले उत्तेजक-दले च निर्धर्मितावच्छेदकत्वनिवेशस्यावश्यकत्वे चेत्यर्थः, अस्य खलु "**व्यभिचाराभावेन**" इत्यग्रेण सह सम्बन्धः। "**अनुमितौ धर्मितावच्छेदकभानस्यावश्यकतया**" इति। एतेनानुमितौ निर्धर्मितावच्छेदकस्थलीयनिरुक्तप्रतिबध्यप्रतिबन्धकभावस्याविषयत्वं सूचितम्। तथाच विरोधिसामग्रीदशायामनुमितिसामग्रीसत्त्वेऽनुमित्सायां सत्यामनुमितिरूपं मानसं स्याद्, असत्यां तु न स्यादेवेति तत्र व्यभिचारस्य प्रसक्तिरेव नास्ति, अतः कस्य वारणार्थ-मनुमित्यन्यत्वं निवेशनीयं स्यादिति भावः। ननु तथापि सधर्मितावच्छेदकमानसस्थलीय-प्रतिबध्यतावच्छेदकदलेऽनुमित्यन्यत्वनिवेशप्रयुक्तगौरवं स्यादित्याशङ्कायामाह "**सधर्मि-तावच्छेदकमानसे च**" इत्यादि। "**योग्यज्ञानस्य**" मानसप्रत्यक्षोपयोगिज्ञानस्य। "**तत्र**" सधर्मितावच्छेदकमानसे, "**कल्पनमेव नास्ति**" इत्यन्तेन सन्दर्भेण सधर्मितावच्छेदकमानस-स्थलीयप्रतिबध्यकोटावप्यनुमित्यन्यत्वनिवेशस्य निष्प्रयोजनत्वं स्फुटीकृतम्, इदानीं सिद्धान्ती अंशतस्तन्मतमभ्युपगम्याप्यनुमितित्वे मानसत्वव्याप्यतावादं निरस्यति-"**इति चेदस्त्येव**" इत्यादिना। व्याप्यतामते कथं लाघवविरह इत्याक्षेपनिरासार्थमाह—"**अनुमितिसामग्रीकाले**" इत्यादि। "**उभयवादिसिद्धत्वा**" दिति। अयं भावः—"अनुमितिसामग्र्युत्तरमस्माभिरिव व्याप्यतावादिभिरपि "पर्वतो वह्निमान्" इत्येतादृशाकारकं ज्ञानमेवाभ्युपेयम्, ननु "वह्निं जानामि" इत्याद्याकारकं ज्ञानादिलौकिकविषयितानिरूपितवह्निविषयताशालिमानसज्ञानं, तथाच तद्वारणायास्मन्मत इव व्याप्यतामतेऽपि तादृशमानसं प्रत्यनुमितिसामग्र्याः प्रति-बन्धकत्वस्वीकारः समान एव। अन्यत् सुगमम्।

**यत्तु यत्र विषये समानविषयकलौकिकप्रत्यक्षसामग्रीकालेऽनुमित्साबलादनुमितिः कदापि न जाता तत्रानुमित्साया उत्तेजकत्वाभावादनुमितिमानससाधारणतद्विषयकमानसत्वं प्रतिबध्यतावच्छेदकीकृत्य तादृशसामग्र्या एक प्रतिबन्धकतयैवोपपत्तिर्व्याप्यत्वमते, विरुद्धत्वमते त्वनुमितित्वमानसत्वयोः प्रतिबध्यतावच्छेदकतया प्रतिबन्धकताद्वयमिति व्याप्यत्वमते लाघवमक्षुण्णमेवेति तदपि न श्रद्धेयम्, तथाहि विरुद्धत्वमतेऽपि विषयविशेषे लाघवसम्भवात्, तथाहि यादृशविषये समानविषयकचाक्षुषादिसामग्रीकालेऽनुमित्यन्यमानसं न जातमपित्वनुमितिरेव, तत्र विरोधिसमाग्र्याः प्रतिबध्यतावच्छेदकं व्याप्यत्वमतेऽनुमितित्वं मानसत्वं वेत्यत्र विनिगमनाविरहात् प्रतिबन्धकताद्वयमिति। विरुद्धत्वमते मानसत्वस्यानुमित्यसंग्राहकतयाऽनुमितित्वमेकमेव प्रतिबध्यतावच्छेदकमिति लाघवमिति।(२६)।**

**वस्तुतस्तु अनुमित्यन्यत्वनिवेशप्रयुक्तगौरवस्याप्यशक्यपरीहारतैव, तथाहि विरोधिसामग्रीकाले पर्वतविषयतानिरूपितवह्निविषयताशालिमानसं जायतामित्याकारकेच्छासत्त्वे वह्नेः पर्वतस्य च विशकलितज्ञानसत्त्वे च ज्ञानांशे वह्निविशेषणकं मानसं न सम्भवति तादृशमानसस्थलीयविरोधिसामग्र्याः प्रतिबन्धकतायां तदिच्छाव्यावृत्तरूपेणैव इच्छाया उत्तेजकत्वस्योपगन्तव्यत्वात्। अन्यथा, तादृशेच्छासत्त्वे पर्वतभासकज्ञानाद्यसत्त्वे वह्निं जानामीत्येतादृशमानसस्य तादृशविरोधिसामग्रीदशायामापत्तेः।(२७)।**

---

(२६) पुनर्व्याप्यत्ववादी अङ्कुरविशेषमभ्युपगम्य लाघवं प्रदर्शयितुमाह-"**यत्त्वि**"-त्यादि। "**तदपि न श्रद्धेयमि**"त्यन्तं सुगमम्। अश्रद्धाबीजमाह "**तथाहि विरुद्धत्वमतेऽपि**" इत्यादिना, अत्र तथाहि इत्यस्याङ्कुरविशेषस्वीकारे हि इत्यर्थः। "**लाघवसम्भवाद्**" इति। लाघवं विवृणोति "**तथाहि यादृशविषये**" इत्यादिना। अन्यत् सुगमम्।

(२७) ननु प्रागुक्तरीत्या विषयविशेषे यदि मतद्वयेऽपि लाघवं तुल्यं तर्हि व्याप्यत्ववादानङ्गीकारे किं विनिगमकमित्याक्षेपनिरासार्थमाह"**वस्तुतस्तु**" इत्यादि। इतः पूर्वम् "अस्त्येव एतादृशरीत्याऽनुमित्यन्यत्वनिवेशप्रयुक्तगौरवपरीहार" इति यदस्माभिः स्वीकृतं तदप्यभ्युपगमवादमात्रम्, वस्तुगत्या तु तादृशगौरवं व्याप्यतामतेऽपरिहार्यमेव, अस्मन्मते तु न तथेति विनिगमकं स्फुटयति"**तथाहि**" इत्यादिना। "**विशकलितज्ञानसत्त्वे**"इति। निरूप्यनिरूपकभावानापन्नविषयताशालि वह्निपर्वतयोर्ज्ञानं "**वह्निः**" '**पर्वतः**' इत्याकारकं विशकलितज्ञानं तस्य सत्त्वे इत्यर्थः। "**ज्ञानांशे वह्निविशेषणकं मानसं**" वह्निं जानामीत्याकारमानसम्। "**न सम्भवति**" इत्यस्य हेतुमाह"**तादृशमानसे**"त्यादिना, अत्र तादृशमानसं दर्शिताकारमानसम्। "**तदिच्छाव्यावृत्तरूपेणैव**" इति। पर्वतविषयतानिरूपितवह्निविषयताशालिमानसेच्छायामविद्यमानं यत् वह्निज्ञानमानसं जायतामित्याकारेच्छात्वं तेन रूपेणैवेत्यर्थः। "**अन्यथा**" तदिच्छासाधारणेन मानसेच्छात्वादिना उत्तेजकत्वे। "**तादृशेच्छासत्त्वे**" पर्वतविषयतानिरूपितवह्निविषयताशालिमानसेच्छासत्त्वे।

**नापि वह्निविशिष्टपर्वतवैशिष्ट्यावगाहिमानसं तत्र सम्भवति, तत्र वह्निमान् पर्वत इत्येतादृशविशेषणतावच्छेदकप्रकारकनिर्णयस्यापेक्षितत्वात्। केवलं विशेष्येविशेषणरीत्या वह्निमत्पर्वतं जानामीत्येतादृशबोधस्तु नाङ्गीकर्तुं शक्यते विशेषणांशे विशिष्टवैशिष्ट्यानवगाहिज्ञानादिप्रत्यक्षस्यानभ्युपगमाद्, एवं वह्न्यविशेषितपर्वतविशेषितज्ञानमानसमपि न सम्भवति तादृशमानसस्थलीयविरोधिसामग्रीप्रतिबन्धकतायामपि उपदर्शितेच्छाया अनुत्तेजकत्वात्, तथात्वे विरोधिसामग्रीदशायां तादृशेच्छासत्त्वे वह्निभासकज्ञानाद्यसत्त्वे पर्वतं जानामीत्यादिमानसप्रसङ्गात्, तस्मात् तत्र कथञ्चिदपि ज्ञानभानासम्भवात् पर्वतो वह्निमानित्याकारकं ज्ञानाद्यविषयकमेव मानसं तदनुरोधेन ज्ञानादिविषयतामनिवेश्य प्रतिबन्धकत्वान्तरञ्चोपगन्तव्यमिति तत्रानुमित्यन्यत्वनिवेशनमावश्यकं व्याप्य[त्व]मते, अन्यथा अनुमितौ व्यभिचारात्।(२८)।**

---

(२८) नन्वेवं तत्र "वह्निमत् पर्वतं जानामि" इत्याकारमेव मानसं स्यादित्याक्षेपं निरस्यति "**नापी**"त्यादिना, वह्निविशिष्टपर्वतवैशिष्ट्यावगाहिमानसमपि न सम्भवतीत्यन्वयः। कुतो न सम्भवति तदाह '**तत्रे**'त्यादिना, "तत्र" तादृशविशिष्टवैशिष्ट्यावगाहिमानसे। '**अपेक्षितत्वादि**"ति। विशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन कारणत्वादिति बोध्यम्। अथ तादृशमानसासम्भवेऽपि "पर्वतं जानामि" इत्याकारकं मानसं तत्र सम्भवत्येव इत्याशङ्कामपि निराकरोति "**एव**"मित्यादिना। "**वह्न्यविशेषितपर्वतविशेषितज्ञानमानसमपि**" इति। अत्रादर्शपुस्तके "वह्न्यविशेषितपर्वतविशेषितजनकज्ञानमपि" इत्याकारः पाठ उपलभ्यते, तस्यार्थसङ्गतिराहित्येन उल्लिखिताकारः पाठः कल्पितः, तादृशपाठप्रतिपाद्यं "पर्वतं जानामि" इत्याकारं मानसं बोध्यम्।

"**उपदर्शितेच्छायाः**", पर्वतविषयतानिरूपितवह्निविषयताशालिमानसं जायताम् इत्याकारायाः प्राक्प्रदर्शितेच्छायाः। "**तथात्वे**" उत्तेजकत्वे, "**तस्मात्**" पूर्वपूर्वप्रदर्शितयुक्तिवशात्, "**तत्र**" विरोधिसामग्रीदशायां पर्वतविषयतानिरूपितवह्निविषयताशालिमानसेच्छासत्त्वे, **मानसम्** इति "**उपगन्तव्यम्**" इति परेणान्वेति।

"**तदनुरोधेन**" इति, निरुक्तेच्छाधीनस्य पर्वतो वह्निमानित्याकारमानसस्य उपपत्त्यनुरोधेनेत्यर्थः। **प्रतिबन्धकत्वान्तरञ्च**" इति, पर्वतविषयतानिरूपितवह्निविषयताशालिमानसत्वावच्छिन्नं प्रति तादृशमानसेच्छाविरहविशिष्टाया एव विरोधिसामग्र्याः प्रतिबन्धकत्वमितिरीत्या प्रतिबध्यप्रतिबन्धकभावः कल्पनीयः। "**तत्र**" तादृशप्रतिबध्यप्रतिबन्धकभावीयप्रतिबध्यदले। "**अनुमित्यन्यत्वनिवेशनमावश्यकम्**"। तत्रावश्यकत्वे हेतुमाह "**अन्यथानुमितौ व्यभिचाराद्**" इति। अयं भावः—प्रतिबध्यदले अनुमित्यन्यत्वानिवेशे तत्र "पर्वतो वह्निमान्" इत्यनुमितेः प्रसङ्गः, व्याप्यतावादिमते मानसत्वेनानुमितेरपीच्छाविषयत्वात्।

**अत्रोच्यते, अनुमितित्वस्य मानसत्वव्याप्यत्वमते भिन्नविषयकचाक्षुषादिसामग्रीप्रतिबध्यतावच्छेदककोटावनुमित्यन्यत्वस्य निवेशस्याधिक्यात् प्रकारान्तरेण लाघवसम्भवाच्चानुमितित्वं मानसत्वविरुद्धमास्तां प्रत्यक्षत्वव्याप्यत्वन्तु तस्य निराबाधं सयुक्तिकञ्च, तथाहि—अनुमितौ प्रत्यक्षत्वोपगमेऽनुमितौ विशेषणतावच्छेदकप्रकारकज्ञानादीनां स्वातन्त्र्येण हेतुता न कल्प्यते, प्रत्यक्षस्थलीयतज्जन्यतावच्छेदकस्य विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षत्वस्यानुमितावपि सत्त्वात् तत्स्थलीय हेतुतयैवोपपत्तेः, विरुद्धत्वमते—तत्र हेत्वन्तरकल्पनमावश्यकम् ।**

**न च प्रत्यक्षानुमितिसाधारणविशिष्टवैशिष्ट्यानुभवत्वस्यैव जन्यतावच्छेदकत्वाद्, विरुद्धत्वमतेऽप्येकहेतुतयैवोपपत्तिरिति वाच्यं, प्रत्यक्षत्वातिरिक्तायामनुभवत्वजातौ मानाभावात्, विशिष्टवैशिष्ट्यावगाहिज्ञानत्वस्य तथात्वं न सम्भवति तथाविधस्मरणे व्यभिचारात् ।(२६)।**

---

(२६) प्रागुक्तरीत्या अनुमितित्वे मानसत्वव्याप्यतावादस्य निराकृतत्वेऽपि तत्र प्रत्यक्षत्वव्याप्यतावादं पुनरुत्थापयति "**अत्रोच्यते**" इत्यादिना । "**प्रकारान्तरेण**" मानसत्वविरुद्धत्वमते इति यावत्, "**लाघवसम्भवाच्च**" इति, अत्रोक्तलाघवसम्पादकं प्रकारान्तरमितः प्राक् मूले "वस्तुतस्तु" कल्पात् पूर्वतनांशे "तथाहि यादृशविषये समानविषयकचाक्षुषादिसामग्रीकाले" इत्यादिसन्दर्भेण सुष्ठु प्रदर्शितमिति नात्र विव्रियते । "**सयुक्तिकञ्चे**"त्यत्र सयुक्तिकत्वं प्रतिपादयति "**तथाहि**" इत्यादिना । "**विशेषणतावच्छेदकप्रकारकज्ञानादीनाम्**" इत्यत्रादिपदेन धर्मिज्ञानस्य परिग्रहः । "**तत्र हेत्वन्तरकल्पनमावश्यकम्**" अनुमितिं प्रति विशेषणतावच्छेदकप्रकारकज्ञानादेः पृथक् कारणत्वकल्पनमावश्यकमित्यर्थः । **नचेत्यादि वाच्यमि**त्यन्तं सुगमम् । "**अनुभवत्वजातौ मानाभावात्**" इति, जातिस्वीकारं प्रत्यनुवृत्तिप्रत्ययः, कार्यत्वकारणत्वयोरतिप्रसङ्गाद्यनापादकानुगतधर्मावच्छिन्नत्वव्यवस्था वा प्रमाणत्वेन परिगृह्यते, अनुभवत्वजातिं प्रति तादृशस्य कस्यापि प्रमाणस्याभावान्नासौ जातिः स्वीकर्तव्येति ग्रन्थकर्तुराशयः । परन्तु इदमत्रावधेयम्—अनुमितिग्रन्थे विशिष्टस्मरणेऽनुमितिलक्षणस्यातिव्याप्तिविचारप्रस्तावे दीधितिकारपादानां गदाधरभट्टाचार्याणाञ्च लिखनस्वरसादनुभवत्वाख्यजातिः सुप्रतीतैवेति । नन्वनुभवत्वजातेरस्वीकारेऽपि विशिष्टवैशिष्ट्यावगाहिज्ञानत्वमेव विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकमस्तु इत्याशंकायामाह—**विशिष्टवैशिष्ट्यावगाहीत्यादि ।**

"**तथाविधस्मरणे**" इति । विशिष्टवैशिष्ट्यावगाहिस्मरण इत्यर्थः । "**व्यभिचाराद्**" इति, तथाविधस्मरणेऽपि विशिष्टवैशिष्ट्यावगाहिज्ञानत्वमस्ति किन्तु तादृशस्मरणात् प्राक् नियमतो न विशेषणतावच्छेदकप्रकारकज्ञानापेक्षा, विशेष्ये विशेषणमितिरीत्या विषयाणां ज्ञानेनोत्पन्नात् संस्कारादप्युद्बोधकवैशिष्ट्येन विशिष्टवैशिष्ट्यावगाहिस्मरणोत्पत्तिसम्भवाद्, एवञ्च तादृशस्मरणे व्यतिरेकव्यभिचार इति भावः ।

**यदि च विशेष्ये विशेषणमिति न्यायेनैव स्मृतिरुत्पत्स्यते तथापि नित्यसाधारणतया तस्य तथात्वासम्भवात्; न च तवापि विशिष्टवैशिष्ट्यप्रत्यक्षत्वस्य तथात्वेऽप्येष दोष इति वाच्यं, मन्मते प्रत्यक्षत्वव्याप्यजन्यप्रत्यक्षवृत्तिजातिविशेषस्य तथात्वोपगमात्, नचेश्वरज्ञाने विशिष्टवैशिष्ट्यविषयतानभ्युपगमेन नित्यव्यावृत्ता सैव विषयता जन्यतावच्छेदिकेत्यभ्युपेयत इति वाच्यम्, एवमपि तादृशजातिविशेषापेक्षया विषयताया गुरुतयाऽवच्छेदकगौरवं दुर्वारम्।(३०)।**

**विशिष्टवैशिष्ट्यानवगाहिजन्यप्रत्यक्षे व्यभिचारवारणाय तादृशविषयताया जन्यतावच्छेदककोटिप्रवेशः सर्वसम्मत एव इति तु नाशङ्कनीयम्, स्वमते अनुमितेरात्मनिष्ठप्रत्यासत्तिकल्पे [काले*] विषयभेदेन कार्यकारणभावबाहुल्यात् प्रकारतात्मकविषयनिष्ठप्रत्यासत्त्यैव विशेषणतावच्छेदकप्रकारक-**

---

(३०) ननु तादृशस्थलीयस्मृतेरपि विशेष्ये विशेषणमितिरीत्यैवाभ्युपगमे न व्यभिचार इत्यतो दोषान्तरं प्रदर्शयितुमाह **"यदिच"** इत्यादि। **"तस्य"** विशिष्टवैशिष्ट्यावगाहिज्ञानत्वस्य। **"नित्यसाधारणतया"** ईश्वरज्ञानेऽपि वर्तमानतया। **"तथात्वासम्भवात्"** विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकत्वासम्भवात्, जन्यतापेक्षया तादृशज्ञानत्वरूपधर्मस्यातिरिक्तवृत्तित्वादिति भावः। **"नचे"**त्यादि। **"तथात्वेऽपि"** जन्यतावच्छेदकत्वस्वीकारेऽपि। **"एष दोष"** इति, तादृशप्रत्यक्षत्वस्यापि नित्ये ईश्वरप्रत्यक्षे वर्तमानतया जन्यतातिप्रसक्ततया तस्य विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकत्वस्वीकारासम्भवरूपो दोष इत्यर्थः।

**"मन्मते"** इति, अनुमितित्वस्य प्रत्यक्षत्वव्याप्यतावादिमत इत्यर्थः। **"जन्यप्रत्यक्षवृत्तिजातिविशेषस्य"** जन्यप्रत्यक्षमात्रवृत्तेर्जन्यप्रत्यक्षत्वरूपजातिविशेषस्येत्यर्थः। **"तथात्वोपगमात्"** तादृशजन्यतावच्छेदकत्वस्वीकारात्। विरुद्धत्वमतेऽपि प्रत्यक्षानुमित्यादिसाधारणमेकं जन्यतावच्छेदकं वक्तुं शक्यमित्याशयेनाह **"नचेश्वरज्ञाने"** इत्यादि। अत्र सप्तम्यर्थो निरूपितत्वं, तथाच विशिष्टवैशिष्ट्यविषयतायामीश्वरज्ञाननिरूपितत्वानभ्युपगमेनेत्यर्थः। **"नित्यव्यावृत्ता"** निरूपकत्वसम्बन्धेनेश्वरज्ञानेऽवर्तमाना। **"सैव विषयता"** विशिष्टवैशिष्ट्यविषयतैव। **"जन्यतावच्छेदिका"** विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदिकेत्यर्थः। ननु ईश्वरज्ञाने विशिष्टवैशिष्ट्यावगाहित्वानभ्युपगमे ईश्वरस्य सर्वज्ञत्वहानिप्रसङ्ग इति चेन्न, प्रातिस्विकरूपेण सर्ववस्तुविषयकज्ञानस्य तत्र स्वीकारादेव तस्य सर्वज्ञतोपपत्तेः। उक्तविषयताया जन्यतावच्छेदकत्वं खण्डयति **"एवमपि"** इत्यादिना। **"विषयताया"** इति विशिष्टवैशिष्ट्यविषयताया इत्यर्थः। **"गुरुतया"** शरीरगौरवेण, विषयभेदभिन्नानां तादृशविषयतानां सङ्ख्यागौरवेण चेत्यर्थः।

---

* आदर्शपुस्तके "प्रत्यासतिकाले" इत्येवं पाठः स्थितः।

**ज्ञानत्वेन हेतुतादरणीया तत्र च प्रकारतावच्छेदकताया एव प्रत्यासत्तित्वस्योपगन्तव्यत्वात्, निरवच्छिन्नप्रकारताकस्य विशिष्टवैशिष्ट्यानवगाहिज्ञानस्य च प्रकारतावच्छेदकतासम्बन्धेनानुत्पत्त्या व्यभिचारो न भवति इति तादृशविषयत्वाविशेषितस्यैव जातिविशेषस्य जन्यतावच्छेदकत्वं (न) सम्भवति।३१।**

**अथास्तु विजातीयप्रत्यक्षत्वमेव विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकं तथाप्यनुमितौ विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वान्तरं न कल्प्यते तेन वह्नित्वविशिष्टवैशिष्ट्यावगाहिन्याः पर्वतो वह्निमानित्यनुमितेः वह्नित्वप्रकारकज्ञानशून्यकाले परामर्शविरहेणैवापत्त्यभावात् परामर्शकाले वह्नित्वप्रकारकज्ञानस्यावश्यकत्वादिति चेत्, मास्तु पर्वतो वह्निमानित्यनुमितौ वह्नित्वादिप्रकारकज्ञानस्य हेतुत्वान्तरं पृथिवीतरभेदवतीत्याद्यनुमितौ इतरभेदत्वादिप्रकारकज्ञानस्य तथात्वकल्पनमावश्यकम्, अन्यथा इतरत्वव्यापकी-**

---

(३१) फलमुखं गौरवं न दोषायेति नियमेन प्रागुक्तगौरवस्यादोषत्वमाशंकते "**विशिष्टवैशिष्ट्यानवगाही**"त्यादिना। "**व्यभिचारवारणाय**" इति। जन्यप्रत्यक्षत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणत्वे घट इत्याद्याकारकं यद् विशिष्टवैशिष्ट्यानवगाहिजन्यप्रत्यक्षं तस्य विशेषणतावच्छेदकप्रकारकज्ञाननिरपेक्षतया तादृशप्रत्यक्षान्तर्भावेण जन्यप्रत्यक्षत्वस्य विशेषणतावच्छेदकप्रकारकज्ञानजन्यत्वाभाववद्वृत्तितया सम्पद्यमानो यो व्यभिचारस्तस्य वारणायेत्यर्थः। "**तादृशविषयतायाः**" विशिष्टवैशिष्ट्यविषयतायाः। "**जन्यतावच्छेदककोटिप्रवेशः सर्वसम्मत**" इति। एवञ्च तादृशविषयताया एव प्रत्यक्षानुमितिसाधारणविशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकत्वसम्भवेनानुमितित्वस्य प्रत्यक्षत्वविरुद्धतापक्षेऽपि न गौरवावकाश इति भावः। एतादृशं कल्पं खण्डयति "**इति तु नाशङ्कनीयम्**" इत्यादिना। "**स्वमते**", विरुद्धत्ववादिमते। "**आत्मनिष्ठप्रत्यासत्तिकल्पे**", समवायसम्बन्धेन विशिष्टवैशिष्ट्यावगाह्यनुमितिं प्रति तादृशसम्बन्धेन विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणताकल्पे। "**विषयभेदेन**" इत्यादि। वह्नित्वावच्छिन्नविधेयताकानुमितिं प्रति वह्नित्वप्रकारकनिश्चयत्वेन कारणत्वं घटत्वावच्छिन्नविधेयताकानुमितिं प्रति घटत्वप्रकारकनिश्चयत्वेनेति रीत्या विषयविशेषमन्तर्भाव्य कार्यकारणभावस्वीकारस्यावश्यकतया कार्यकारणभावबाहुल्यं बोध्यम्। "**तत्र च**" कार्यदले तु। "**प्रत्यासत्तित्वस्य**" कार्यतावच्छेदकसम्बन्धत्वस्य। "**उपगन्तव्यत्वात्**" व्याप्यतावादिभिः स्वीकरणीयत्वात्। "**व्यभिचारो न भवति**" इत्यन्तं सुगमम्। "**तादृशविषयत्वाविशेषितस्यैव**" विशिष्टवैशिष्ट्यविषयत्वानियन्त्रितस्यैव। "**जातिविशेषस्य**" जन्यप्रत्यक्षत्वस्य। "**जन्यतावच्छेदकत्वं**" विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकत्वम्। आदर्शपुस्तके जन्यतावच्छेदकत्वमित्यस्मात् परं "**न सम्भवति**" इति पाठो दृश्यते, तत्र "न"कारस्यार्थसङ्गतिः कथमपि भवितुं नार्हतीति "**न**" कारं वेष्टनीमध्ये निवेश्य केवलं "सम्भवति" इति पाठो गृहीतः।

**भूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्याकारकपरामर्शात् स्वातन्त्र्येणेतरभेदोपस्थितिदशायामिव तच्छून्यकालेऽपि पृथिवीतरभेदवतीत्याकारकानुमित्यापत्तिः, तस्मादनुमितित्वस्य प्रत्यक्षत्वविरुद्धत्वनये अनुमितौ विशेषणतावच्छेदकप्रकारकज्ञानहेतुताधिक्याद् व्याप्यत्वमते लाघवमक्षुण्णमेव ।३२।**

**वस्तुतस्तु, अनुमितित्वस्य मानसत्वव्याप्यत्वेऽपि बाधकाभावान्मानसं प्रत्यनुमितिसामग्रीप्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवमक्षुण्णमेव सम्भवति, तथाहि —अनुमितित्वस्य मानसत्वव्याप्यत्वे भिन्नविषयकचाक्षुषादिसामग्रीप्रतिबध्यतावच्छेदककोटावनुमित्यन्यत्वनिवेशप्रयुक्तगौरवमुपदर्शितं, तदेव न, यतो निखिलानुमित्यन्यमानसेष्वात्मत्वभानमुपेयते, एवञ्च मानसस्थले लौकिकविषयतासम्बन्धेनात्मत्वमेव निवेश्यते, अनुमितौ चात्मत्वनिरूपितलौकिकविषयित्वाभावेन न व्यभिचार इति विनैवानुमित्यन्यत्वनिवेशमुपपत्तिः ।३३।**

**अथ विरोधिसामग्रीकाले पर्वतविषयतानिरूपितवह्निविषयताशालिमानसं जायतामितीच्छासत्त्वे वह्नेः पर्वतस्य च विशकलितज्ञानसत्त्वे पूर्वदर्शितरीत्या**

---

(३२) विरुद्धत्ववादी शंकते **"अथास्तु"** इत्यादि। **"विजातीयप्रत्यक्षत्वम्"** जन्यप्रत्यक्षत्वम्।" **"तथाप्यनुमितौ"** इत्यादि **"इति चेद्"** इत्यन्तं सुगमम्। शंकां निरस्यति **"मास्तु"** इत्यादिना। **"तयात्वकल्पनम्"** कारणत्वकल्पनम्। **"अन्यया"** इतरभेदसाध्यकानुमितौ इतरभेदत्वप्रकारकज्ञानस्य कारणत्वाकल्पने। इतरत्वव्यापकीभूतेत्यत्र आदर्शपुस्तके इतरभेदव्यापकीभूतेति पाठ उपलभ्यते सहि प्रामादिक इति तमुपेक्ष्य निरुक्तः पाठः कल्पितः। **"स्वातन्त्र्येण"** इतरभेदत्वप्रकारेण। **"तच्छून्यकालेऽपि"** इतरभेदत्वप्रकारकोपस्थितिविरहदशायामपीत्यर्थः। **"व्याप्यत्वमते"** प्रत्यक्षत्वव्याप्यत्वमते।

(३३) **"वस्तुतस्तु"** इत्यादि। **"बाधकाभावाद्"** इति, पूर्वप्रदर्शितगौरवरूपबाधकस्य प्रकारान्तरेण समाधातुं शक्यत्वादित्यर्थः, तच्च प्रकारान्तरं प्रदर्शयितुकामः प्रथमतः प्रागुक्तं गौरवं स्मारयति **"तथाही"**त्यादिना। **"गौरवमुपदर्शितम्"** इति, मूले (१६) चिह्नित सन्दर्भे (१८) चिह्नितसन्दर्भे च प्रदर्शितगौरवमवगन्तव्यम्। इदानीं तद्गौरवं निरसितुमाह **"तदेव न"** इत्यादि।

**"आत्मत्वभानमुपेयते"** इति। अयं भावः—अनुमितिभिन्नेषु **'अहं सुखी"** **"अहं जानामि"** इत्यादिषु निखिलमानसज्ञानेषु विशेष्यविधया आत्मा, तत्र च विशेष्यतावच्छेदकविधयाऽऽत्मत्वं भासते। **"एवञ्च"** आत्मत्वभानस्यावश्यकत्वे च। "मानसस्थले" मानसज्ञाननिष्ठप्रतिबध्यतावच्छेदककोटौ। **"लौकिकविषयतासम्बन्धेनात्मत्वमेव निवेश्यते"** इति, स्वनिष्ठलौकिकविषयतानिरूपितविषयित्वसम्बन्धेनात्मत्वविशिष्टमानसत्वावच्छिन्नं प्रति भिन्नविषयकचाक्षुषादिसामग्री प्रतिबन्धिकेति रीत्या प्रतिबध्यप्रतिबन्धकभावः कल्प्यत इत्यर्थः। अन्यत् सुगमम्।

**ज्ञानादिभानासम्भवादात्मभानमपि न सम्भवति, तस्य योग्यविशेषगुणविनिर्मोकेण मानाभावात्। तथाचात्माविषयकप्रत्यक्षस्यात्मत्वाविषयकत्वनियमात्, तादृशस्थले आत्मत्वाविषयकमानसं भविष्यतीति तदसंग्राहकतया च न विरोधिसामग्रीप्रतिबध्यतावच्छेदकत्वमात्मत्वस्योपपद्यते इति चेत् सत्यं, मानसस्थलीयविरोधिसामग्रीप्रतिबन्धकतायामिच्छाया उत्तेजकत्वे तत्र न सम्भवत्येव ज्ञानदीनां भानं, तदेव न, तत्रेच्छाया उत्तेजकत्वे विषयभेदेन प्रतिबध्यप्रतिबन्धकानन्त्यात्।३४।**

**किन्तु विषयित्वविषयत्वोभयसम्बन्धेनेच्छावदन्यत्वमेव इच्छाधीनप्रत्यक्षे व्यभिचारवारणाय कार्यतावच्छेदककोटौ निवेश्यते, भवति हि घटमानसं जायतामित्यादीच्छाधीनघटादिगोचरनिखिलमानसं तादृशोभयसम्बन्धेनेच्छावत्, तथाविधमानसाव्यवहितप्राक्क्षणे तादृशेच्छाया नियमतः सत्त्वात्, निखिलतथाविधमानसेषु तदिच्छाया अपि भाने बाधकाभावेन तद्विषयितायास्तद्विषयतायाश्च तत्र सत्त्वात्।(३५)।**

---

(३४) प्रतिबध्यतावच्छेदककोटावात्मत्वस्य निवेशे दोषमाशंकते "**अथ**" इत्यादिना। "**पूर्वदर्शितरीत्या**" मूले २७।२८ सन्दर्भप्रदर्शितरीत्या, तत्रैव पूर्वटीकायां सर्वं व्याख्यातम्। "**तस्य**" आत्मभानस्य, एतत्तु भानं प्रत्यक्षरूपं बोध्यम्। "**योग्यविशेषगुणविनिर्मोकेण**" अतीन्द्रियानां धर्माधर्मभावनानां व्यवच्छेदाय योग्यपदम्, आत्मनो योग्या विशेषगुणाः सुखदुःखेच्छाद्वेषज्ञानकृतयः, तद्विनिर्मोकेण प्रकारविधया तेषां गुणानामेकमपि विषयमकृत्वा इत्यर्थः। "**मानाभावाद्**" इत्यस्य पूर्ववर्तिना "**तस्य**" इत्यनेन सम्बन्धः। योग्यविशेषगुणोपरागेणैवात्मनः प्रत्यक्षत्वनियम इति बोध्यम्। "**तथाच**" प्रागुक्तस्थलविशेषे ज्ञानादिभानासम्भवेनात्मनोऽपि भानासम्भवे च। "**आत्माविषयकप्रत्यक्षस्य**" आत्मा न विषयो यस्य तादृशप्रत्यक्षस्येत्यर्थः। "**तादृशस्थले**" विरोधिसामग्रीकाले पर्वतविषयतानिरूपितेत्यादिना प्राक्प्रदर्शितस्थले, "**आत्मत्वाविषयकमानसम्**" पर्वतो वह्निमानित्याकारं मानसमित्यर्थः। "**तदसंग्राहकतया**" विरोधिसामग्र्या अवश्यप्रतिबध्यस्य तादृशमानसस्य अप्रापकतया, आत्मत्वविशिष्टमानसत्वरूपधर्मस्य निरुक्तमानसेऽसत्त्वेनेतियावत्। आत्मत्वस्य विरोधिसामग्रीप्रतिबध्यतावच्छेदकत्वं नोपपद्यत इत्यन्वयः। निरुक्तशंकां निरस्यति "**सत्य**"मित्यादिना। "**तदेव न**" विरोधिसामग्रीप्रतिबन्धकतायामिच्छाया उत्तेजकत्वं कल्पयितुं नैव शक्यमित्यर्थः। तत्र हेतुमाह "**तत्रेच्छाया**" इत्यादिना, "**विषयभेदेन प्रतिबध्यप्रतिबन्धकानन्त्याद्**" इति, घटमानसं प्रति घटमानसेच्छाविरहविशिष्टविरोधिसामग्र्याः प्रतिबन्धकत्वम् इत्यादिरीत्या विषयविशेषमन्तर्भाव्य नाना प्रतिबध्यप्रतिबन्धकभावकल्पनावश्यकत्वेन गौरवप्रसङ्गादित्यर्थः।

(३५) नन्वेवमिच्छाया अनुत्तेजकत्वे विरोधिसामग्रीदशायां घटमानसं जायता-

**विषयतानिवेशात् पटमानसेच्छाविषयकघटादिगोचरमानसस्यासंग्रहः। निखिलानामेव मानसानां विषयतासम्बन्धेन कालान्तरेच्छावत्तया विषयता-सम्बन्धेनेच्छावदन्यमानसाप्रसिद्धिरित्यतो विषयिताप्रवेशः। एवञ्चोपदर्शित-स्थलीय पर्वतो वह्निमानित्यादिमानसे वह्नीयत्वादिना ज्ञानादिभाने बाधका-भावात् तथा सत्यपि तत्रोपदर्शितोभयसम्बन्धेन इच्छावत्त्वस्याक्षततया विरोधि-सामग्र्यभावहेतुतायां व्यभिचाराप्रसक्तेरिति।(३६)।**

---

मितीच्छासत्त्वेऽपि तन्मानसं न स्याद् वस्तुतस्तत्र तादृशमानसस्य सर्वानुभवसिद्धत्वेना-पलपितुमशक्यतया अवश्यं तन्मानसं स्वीकर्तव्यम्। तत्पूर्वं विरोधिसामग्रीरूपप्रतिबन्धकस्य सत्त्वेन तदभावरूपकारणासत्त्वात् फलतो व्यतिरेकव्यभिचारप्रसक्तिरित्याशङ्कां प्रकारान्तरेण समाधातुमाह "**किन्तु**" इत्यादि।

"**इच्छाधीनप्रत्यक्षे**" विरोधिसामग्र्युत्तरमिच्छावशादुत्पद्यमाने मानसप्रत्यक्षे। "**व्यभिचारवारणाय**" प्रागुक्तव्यभिचारस्य वारणाय। "**कार्यतावच्छेदककोटौ**" विरोधि-सामग्र्यभावरूपकारणस्य कार्यतावच्छेदकदले। "**निवेश्यते**" इति, तथाचायं निष्कर्षः— विषयित्वविषयत्वोभयसम्बन्धेन इच्छाविशिष्टान्यमानसत्वावच्छिन्नं प्रति भिन्नविषयक-चाक्षुषादिसामग्र्याः प्रतिबन्धकत्वम्, तदभावस्य कारणत्वमिति। एवञ्च घटमानसेच्छा-वशादुत्पद्यमाने तादृशमानसे इच्छावदन्यत्वासत्त्वेन कार्यतावच्छेदकानाक्रान्ततया तत्पूर्वं विरोधिसामग्र्यभावरूपकारणासत्त्वेऽपि न व्यभिचार इति। तादृशमानसे इच्छाविशिष्टान्य-त्वस्यासत्त्वं स्फुटयति "**भवति हि**" इत्यादिना, सुगमम्।

(३६) विषयत्व-विषयित्वेतिसम्बन्धद्वयस्य क्रमेण प्रयोजनं दर्शयति "**विषयता-निवेशाद्**" इत्यादिना, विरोधिसामग्रीप्रतिबध्यतावच्छेदककोटौ यदि केवलं विषयित्व-सम्बन्धेनेच्छाविशिष्टान्यत्वं निवेश्यते, तर्हि विरोधिसामग्र्युत्तरं घटमानसेच्छां विनापि पटमानसेच्छाविषयकघटमानसस्य आपत्तिः स्यात्, तादृशघटमानसस्य विषयित्वसम्बन्धेन पटमानसेच्छाविशिष्टतया प्रतिबध्यतावच्छेदकरूपानाक्रान्तत्वात्। नच पटमानसेच्छा-विषयकघटमानसरूपस्यापाद्यस्याप्रसिद्ध्या कथमुक्तापत्तिरिति वाच्यम्, विरोधिसामग्र्य-सत्त्वे स्वसामग्रीबलाद् "घटं जानामि" इत्याकारं यद् घटमानसं जायते तत्र पूर्वोत्पन्नायाः पटमानसेच्छाया विषयितया सत्त्वे बाधकाभावाद्, भिन्नकालीनस्यापि पदार्थस्य विषयिता-सम्बन्धेन ज्ञानादिवृत्तित्वस्य सर्वसिद्धत्वात्। ननु पटमानसेच्छाविषयकघटमानसस्य कीदृश आकार इति चेत् "पूर्वोत्पन्नपटमानसेच्छोऽहं घटं जानामि" इत्येतादृश आकार इति बोध्यम्। विषयत्वसम्बन्धनिवेशे तु तादृशघटमानसे कस्या अपीच्छाया विषयत्वाभावात् तत्र विषयत्वघटितोभयसम्बन्धेनेच्छावत्त्वं नास्ति, अपितु इच्छावदन्यत्वमेवेति, तथा च विरोधिसामग्रीप्रतिबध्यतयैव तादृशमानसस्यापत्तिवारणमितिग्रन्थतात्पर्यम्। "**असंग्रह**" शब्दस्यात्र आपत्तिवारणरूपार्थपरत्वं बोध्यम्। सम्बन्धदले विषयितानिवेशस्य फलमाह "**निखिलानामेव**" इत्यादिना। "**एवञ्च**" इति, प्रदर्शितरीत्या इच्छावदन्यत्वस्य कार्यता-

**न चोपदर्शितोभयसम्बन्धेनेच्छावदन्यत्वस्य कार्यतावच्छेदकत्वे इच्छां विनापि विरोधिसामग्रीकाले मानसत्वरूपसामान्यधर्मावच्छिन्नस्यापत्तिः, इच्छा-कालीनफलस्य विरोधिसामग्र्यभावजन्यतावच्छेदकानाक्रान्ततया तदुत्पाद-प्रयोजिकाया इच्छाऽघटितसामग्र्या इच्छाशून्यत्वकालेऽप्यक्षतत्वादिति वाच्यम्, इच्छाधीनमानसस्य इच्छाविषयकतया तत्र विषयविधया इच्छाया अपि हेतुतायाः क्लृप्तत्वात् तदुत्पादप्रयोजकेच्छाघटितसामग्र्या इच्छाशून्यकालेऽ-सत्त्वात् ।(३७)।**

---

वच्छेदकत्वे च, अग्रे "**व्यभिचाराप्रसक्तेः**" इत्यनेनास्य सम्बन्धः। "**वह्नीयत्वादिना**" इति-वह्निविषयकत्वादिना इत्यर्थः। "**ज्ञानादिभाने बाधकभावात्**" ज्ञानं न वह्नीयमित्यादिरूप-बाधनिश्चयाद्यभावात्, अपिच वह्निपर्वतयोर्विशकलितज्ञानस्य प्राक् सत्त्वादिति बोध्यम्। "**ज्ञानादि**" इत्यत्रादिपदेन आत्मन आत्मत्वस्य च परिग्रहः। "**तथा सत्यपि**" पर्वतो वह्नि-मानितिमानसे ज्ञानादिभाने सत्यपि। ननु तत्र किमाकारकं ज्ञानादिभानमिति चेत् पर्वतो वह्निमान् वह्निं पर्वतञ्चाहं जानामीत्याकारकं गृह्यताम्। "**तत्र**" तादृशमानसे। "**इच्छा-वत्त्वस्याक्षततया**" इति। तथा च इच्छावदन्यत्वरूपकार्यतावच्छेदकधर्मानाक्रान्तत्वेन तादृश-मानसे विरोधिसामग्र्यभावस्य हेतुत्वाभावादेव न व्यभिचारप्रसक्तिरिति बोध्यम्।

(३७) प्रागुक्तरीत्या इच्छावदन्यत्वस्य कार्यतावच्छेदकत्वं प्रकल्प्य यादृक् समाधानं कृतं तत्र दोषमाशंकते "**नचे**"त्यादिना, अत्र आदर्श पुस्तके "अथोपदर्शितोभयसम्बन्धेनेच्छा-वत्त्वस्य कार्यतावच्छेदकत्वे" इत्याकारो यः पाठो दृश्यते स नितरामसङ्गत इति "अथ"-स्थले नचेति, "इच्छावत्त्वस्थले" च इच्छावदन्यत्वेति परिवर्त्य "**नचोपदर्शितोभयसम्बन्धे-नेच्छावदन्यत्वस्य कार्यतावच्छेदकत्वे**" इत्याकारः पाठो मूले सन्निवेशितः। "**मानसत्व-रूपसामान्यधर्मावच्छिन्नस्य**" इति, इच्छावदन्यत्वाविशेषितस्य मानसत्वावच्छिन्नस्येत्यर्थः। "**आपत्ति**"रिति आपत्तिप्रयोजकं तादृशसामान्यधर्मावच्छिन्नजनकसामग्रीसत्त्वं स्फुटयति "**इच्छाकालीनफलस्ये**"त्यादिना। "**तदुत्पादप्रयोजिकायाः**" इत्यादि। "तस्य" वस्तुगत्या इच्छाकालीनस्यापि मानसत्वरूपसामान्यधर्मावच्छिन्नस्य, उत्पादप्रयोजिकायाः उत्पत्तिं प्रति हेतुभूतायाः। "**इच्छाऽघटितसामग्र्या**" इति, अयमाशयः—मानसं प्रति विरोधिसामग्र्याः प्रतिबन्धकत्वं, तत्र चेच्छाविशेषस्योत्तेजकत्वम् इत्येवंरीत्या प्रतिबध्यप्रतिबन्धकभाववादिनां मत एव मानसत्वरूपसामान्यधर्मावच्छिन्नं प्रत्युत्तेजकीभूतेच्छाविरहविशिष्टविरोधिसामग्र्य-भावस्य हेतुतया तादृशसामग्र्यभावघटिताया मानससामग्र्याः फलत इच्छाघटितत्वं सम्पद्यते। अथवा, अव्यवहितोत्तरत्वसम्बन्धेन विरोधिसामग्रीविशिष्टमानसं प्रति मानसेच्छा कारणमितिरीत्या कार्यकारणभावेऽपि मानसत्वावच्छिन्नसामग्र्या इच्छाघटितत्वं सम्भवति, किन्तु प्रकृते निरुक्तरीत्या इच्छावदन्यत्वस्य विरोधिसामग्र्यभावजन्यतावच्छेदकत्वपक्षे सामान्यतो मानसत्वावच्छिन्नसामग्रीशरीरे मनःसन्निकर्ष—विषयोपस्थित्यादिकमेव प्रविष्टं नतु इच्छेति, एवञ्चेच्छाशून्यकालेऽपि मानसत्वावच्छिन्नस्य सामग्रीसत्वाद् विरोधिसामग्री-

**अथ प्रत्यक्षं प्रति विषयस्य विषयत्वेन हेतुत्वं क्लृप्तं, नतु इच्छात्वादिना, एवञ्चेच्छात्वावच्छिन्नस्यासत्त्वेऽपि तत्र विषयत्वरूपकारणतावच्छेदकावच्छिन्नस्य सत्त्वे तद्घटितसामग्र्या इच्छाशून्यत्वकाले च सत्त्वात्, सामान्यसामग्र्या अक्षतत्वादितिचेन्मास्तु तादृशक्लृप्तहेतुतया तादृशापत्तेर्वारणं, घटमानसविषयकेच्छाप्रत्यक्षं प्रति घटमानसेच्छात्वादिना हेतुतां कल्पयित्वैव सा वारयितव्या। न चैवं विषयभेदेनेच्छायाः सामग्र्यभावहेतुतान्तरस्य च कल्पनापत्तिरित्येतदपेक्षया विषयभेदेनेच्छाविरहविशिष्टसामग्र्यभावहेतुताकल्पनमेवोचितमिति वाच्यम्, इच्छाया उत्तेजकत्वेऽनन्तसामग्र्यभावानां विषयभेदेन हेतुतापेक्षया सामग्र्यभावानाञ्च निखिलमानससाधारण्येन हेतुताकल्पनस्योचितत्वात्।(३८)।**

---

कालेऽपि तादृशं मानसमुत्पद्यतामिति पर्यवसितः शङ्कार्थः। तादृशशङ्कानिरासायाह **"इच्छाधीनमानसस्य"** इत्यादि। **"इच्छाविषयकतया"** इति, इच्छाधीनमानसाव्यवहितपूर्वक्षणे इच्छाया अवश्यं सत्त्वेनोपनायकीभूतानां योग्यसविषयकानां स्वाव्यवहितोत्तरमानसे भानस्य शास्त्रसिद्धतयेच्छाधीनमानसे इच्छाविषयकत्वं तिष्ठतीति बोध्यम्। **"तत्र"** तादृशमानसे। **"विषयविधया"** विषयत्वरूपेण। **"इच्छाया अपि हेतुतायाः"** अत्र कार्यकारणभावरीतिः विषयतासम्बन्धेन प्रत्यक्षं प्रति तादात्म्यसम्बन्धेन विषयत्वेन कारणत्वमित्येवंरूपा।

(३८) इच्छाविरहदशायामपि मानसत्वरूपसामान्यधर्मावच्छिन्नस्य सामग्र्या अक्षतत्वेन विरोधिसामग्रीकाले तदापत्तिं पुनः शंकते **"अथ प्रत्यक्षं प्रति"** इत्यादिना, शङ्का सुगमा। तां निरसितुमाह **"इति चेत्"** इत्यादि, शङ्काकारिभिर्यदि पूर्वोक्तरूपमुच्यत इत्यर्थः। **"तत्"** तर्हि। **"तादृशक्लृप्तहेतुतया"** शङ्काकारिप्रदर्शितेन विषयत्वावच्छिन्नहेतुत्वेन, तादृशहेतुत्वावच्छिन्नस्येच्छाविरहदशायामपि सत्त्वेनेति भावः। **"तादृशापत्तेर्वारणं मास्तु"** इत्यन्वयः, अतः परं तथापीत्यध्याहार्यम्। आपत्तिवारणानुरोधेन कार्यकारणभावान्तरं कल्पयति **"घटमानसविषयके"**त्यादिना। **"न च"** "इति" **"वाच्य"**मिति परेणान्वयः। **"एव"** मिति, उक्तरीत्या इच्छाया हेतुत्वकल्पनया प्रागुक्तापत्तिवारणे। **"विषयभेदेन"** स्थलभेदेन। **"इच्छाया"** इति **"कल्पनापत्ति"**रित्यग्रेणान्वयः, कारणत्वकल्पनापत्तिरित्यर्थः। **"सामग्र्यभावहेतुतान्तरस्य च"** इत्यस्य विषयभेदेन कल्पनापत्तिरित्यन्वयः। तथाचेच्छाकालीनमानसे इच्छाया हेतुत्वकल्पनम्, विषयत्वविषयित्वोभयसम्बन्धेनेच्छावदन्यमानसे तु विरोधिसामग्र्यभावस्य हेतुत्वकल्पनमिति विभिन्नकारणकल्पनावशाद् गौरवापत्तिरित्यर्थः। **"एतदपेक्षया"** उक्तरीत्या विभिन्नकारणकल्पनापेक्षया। **"विषयभेदेनेच्छाविरहविशिष्टे"**त्यादि, तद्विषयकमानसं प्रति तद्विषयकमानसेच्छाविरहविशिष्टविरोधिसामग्र्यभावस्यैकस्यैव कारणत्वकल्पनमुचितमिति "न च" कल्पीयशङ्काशयः, तच्छङ्कां निरस्यति **"इच्छाया उत्तेजकत्वे"** इत्यादिना। **"अनन्तसामग्र्यभावानां विषयभेदेन हेतुतापेक्षया"** इति। अत्र सामग्रीपदेन प्रकरणाद् विरोधिसामग्र्य एव बोद्धव्याः, **"विषयभेदेने"**त्यत्र विषयभेद उत्तेजकीभूतानामिच्छानां

**यत्तु इच्छादीनां विषयोपधानेनैव मानससम्भवादिच्छांशे विशेषणतया विषयभानप्रतिबन्धकबाधादिदशायां विषयस्य तथा भानासम्भवेनेच्छाभानमपि न सम्भवतीति तदानीमिच्छाऽविषयकस्येच्छाधीनमानसस्य सम्भवात्, तत्र व्यभिचारेणेच्छावदन्यत्वस्य कार्यतावच्छेदककोटिनिवेशकल्पो न साधीयानिति, तदसत्, निर्धर्मितावच्छेदकप्रत्यक्षस्य बाधबुध्यप्रतिबध्यतया तादृशबाधकाले विषयांशे निर्धर्मितावच्छेदकेच्छाभाने बाधकाभावात्, तथाचेच्छावदन्यत्वस्य कार्यतावच्छेदकत्वे बाधकाभावाद् उपदर्शितस्थले ज्ञानादीनां भाने बाधकविरह इति सम्भवत्येव आत्मत्वस्य विरोधिसामग्र्यभावस्य जन्यतावच्छेदककोटि-निवेशनम्।(३६)।**

---

विषयभेदः, तृतीयायाः प्रयोज्यत्वमर्थः, तस्य च "**अनन्त**" शब्दार्थैकदेशे आनन्त्ये सम्बन्धः, आनन्त्यञ्चात्र बहुरूपत्वं बोध्यम्, तथाच विभिन्नविषयकेच्छाविरहविशेषितानां विरोधि-सामग्रीणां विशेष्यविशेषणभावविनिगमनाविरहादिवशाद् बहुरूपतापन्नतया तादृशसामग्र्यभावा अपि बहुसंख्यकाः स्युरिति इच्छाया उत्तेजकत्वपक्ष एव गौरवमधिकमिति बोध्यम्। "**सामग्र्य-भावानाञ्च**" अत्र चकारो निरर्थकः, विरोधिसामग्र्यभावानामिति तदर्थः। "**निखिलमानस-साधारण्येन।**" प्रागुक्तरीत्येच्छावदन्यनिखिलमानसं प्रतीत्यर्थः।

(३६) विरोधिसामग्र्यभावजन्यतावच्छेदककोटौ प्रागुक्तरीत्या इच्छावदन्यत्वनिवेशे दोषमाशङ्कते "**यत्तु**" इत्यादिना। "**विषयोपधानेनैव**" विषयविषयकत्वेनैव, घट-पदादिकं कमपि विषयविशेषं विषयीकृत्यैवेत्यर्थः। "**इच्छादीना**" मित्यस्य "**मानससम्भवाद्**" इत्यत्रान्वयः। विषयविनिर्मोकेण ज्ञानेच्छादेर्मानसानुपगमादिति भावः। "**प्रतिबन्धक-बाधादिदशाया**"मिति। विरोधिसामग्रीकाले घटमानसं जायतामितीच्छायाः सत्त्वेऽपीच्छा न घटीया, इत्याकारकस्य विषयित्वसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावप्रकारकस्ये-च्छाविशेष्यकबाधनिश्चयस्य विद्यमानतादशायामित्यर्थः। "**विषयस्य**" घटस्य। "**तथा भानासम्भवेन**" विषयितासम्बन्धेनेच्छांशे भानासम्भवेन। "**तदानीम्**" तादृशस्थलीय-विरोधिसामग्र्युत्तरम्। "**इच्छाऽविषयकस्येच्छाधीनमानसस्य**" घट इत्याकारकमानसस्य। "**तत्र**" तादृशमानसे। "**व्यभिचारेण**"ति। विरोधिसामग्र्यभावरूपकारणासत्त्वेऽपि इच्छावदन्यत्वावच्छिन्नतादृशमानसरूपकार्योत्पत्त्या व्यतिरेकव्यभिचारप्रसङ्गेनेत्यर्थः। उक्ताक्षेपं निरस्यति "**तदसद्**" इत्यादिना। "**निर्धर्मितावच्छेदकप्रत्यक्षस्य बाधबुद्ध्यप्रति-बध्यतया**" इति। अत्र बाधबुद्धीति बुद्धित्वेन निर्देशान्निश्चयात्मकं संशयात्मकञ्च बाध-ज्ञानं लभ्यते, तत्र बाधसंशयप्रतिबध्यतानुमित्यादौ न सम्भवति, अपि तु प्रत्यक्षनिश्चय एव, तत्र ग्राह्यसंशयस्य प्रतिबन्धकतायाः शास्त्रसिद्धत्वाद्, अतएव "निर्धर्मितावच्छेदक-प्रत्यक्षस्ये"त्यत्र प्रत्यक्षत्वेन निर्देशः कृतः। अथवा, मानसप्रत्यक्षस्थलीयविचारप्रस्तावादत्र प्रत्यक्षपदस्य प्रयोगेऽपि तस्य विशिष्टबुद्धिमात्रपरत्वं "बाधबुद्धी"त्यत्र च बुद्धिशब्दस्य

**अथ कामिनीजिज्ञासाकालीनकामिनीमानसे आत्मत्वस्य भानं न सम्भवति कामिनीजिज्ञासायाः कामिनीभिन्नविषयकज्ञाने विरोधित्वात्, अतस्तदसंग्राहकतया आत्मत्वस्य विरोधिसामग्र्यभावजन्यतावच्छेदकत्वं न सम्भवति। न च तादृशमानसस्य विरोधिसामग्र्यभावजन्यतावच्छेदकानाक्रान्तत्वेऽपि क्षतिविरहः, तत्रेच्छाया हेतुत्वेनेच्छां विना विरोधिसामग्रीकाले तदापत्त्यभावादिति वाच्यम्, इच्छाविषयकप्रत्यक्षे इच्छाया हेतुत्वेन इच्छाया अपि भानासम्भवेन तत्रेच्छाया अतथात्वात्।(४०)।**

---

निश्चयपरत्वमभ्युपगम्य ग्रन्थसङ्गतिर्बोध्या, बाधनिश्चयः स्वीयविशेष्यतावच्छेदकधर्मावच्छिन्नविशेष्यताकविशिष्टबुद्धिमेव प्रतिबन्धाति नतु निरवच्छिन्नविशेष्यताकबुद्धिम्, अतः प्रकृतस्थले विषयोपरागेणेच्छाभानं निराबाधमेवेत्याह "**तादृशबाधकाले**" इत्यादिना। इच्छा न घटीया इत्याकारबाधनिश्चयदशायामिति तदर्थः। "**विषयांशे निर्धर्मितावच्छेदकेच्छाभाने**" इति। अत्र विषयो घटादिस्तदात्मके अंशे, सप्तम्यर्थो निरूपितत्वं तस्य तु धर्मितायामनन्वयः, साच धर्मिता इच्छानिष्ठा निरवच्छिन्ना नतु इच्छात्वं तदवच्छेदकम्। तथा च विषयित्वसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपिता इच्छानिष्ठा या निरवच्छिन्नविशेष्यता तदवच्छिन्ना या इच्छात्वावच्छिन्नप्रकारता तन्निरूपकमानसज्ञाने इति तदर्थो बोध्यः, साक्षात्कारे अन्तरा निर्धर्मितावच्छेदकविषयभानस्यापि शास्त्रसिद्धत्वात्। प्रदर्शितमानसज्ञानस्याकारश्च 'घटेच्छावानहम्' इत्येवंरूपः। एवञ्च निरूक्तरीत्या इच्छावदन्यत्वस्य विरोधिसामग्र्यभावजन्यतावच्छेदकत्वकल्पनसम्भवादेवेच्छाधीनप्रत्यक्षे व्यभिचारनिरासेन विरोधिसामग्रीप्रतिबन्धकतायामिच्छाया उत्तेजकत्वस्वीकारस्यानावश्यकतया (३४) चिह्नितमूलसन्दर्भे अथेत्यादिना समुपन्यस्तायाः प्रतिकूलयुक्तेः खण्डितत्वेन मानसस्थले विरोधिसामग्र्यभावजन्यतावच्छेदककोटावात्मत्वस्य निवेशनं सम्भवत्येव निराबाधमित्याह "**तथाच**"त्यादिना। "**उपदर्शितस्थले**" यत्र विरोधिसामग्रीदशायां पर्वतविषयतानिरूपितवह्निविषयताशालिमानसं जायतामितीच्छासत्त्वे वह्नेः पर्वतस्य च विशकलितज्ञानमस्ति तादृशे प्रागुल्लिखितस्थले (३४ चिह्नितसन्दर्भो द्रष्टव्यः)। "**ज्ञानादीनाम्**" इत्यत्रादिपदेनात्मनः आत्मत्वस्य च परिग्रहः। "**बाधकविरह**" इति। अयमभिप्रायः—तादृशस्थले "पर्वतो वह्निमान् वह्निं पर्वताञ्चाहं जानामी"त्याकारकज्ञानादिविषयकसमूहालम्बनमानसोत्पत्तेः स्वीकारे किमपि बाधकं नास्तीति प्रागुक्तरीत्या आत्मत्वस्य विरोधिसामग्र्यभावजन्यतावच्छेदककोटौ निवेशसम्भवेन व्याप्यतावादिमते विरोधिसामग्रीप्रतिबध्यतावच्छेदकदलेऽनुमित्यन्यत्वनिवेशो नापेक्षित इति तन्मते गौरवाभाव इति पूर्वपक्ष एव पर्यवस्यतीति।

(४०) आत्मत्वस्य विरोधिसामग्र्यभावजन्यतावच्छेदकत्वे बाधकान्तरमाशङ्कते "**अथे**"त्यादिना। "**कामिनीजिज्ञासाकालीनकामिनीमानसे**" इति। विरोधिसामग्रीविरहदशायां कामिनीजिज्ञासानन्तरं जायमाने कामिनीविषयकमानसप्रत्यक्षे इत्यर्थः।

**इति चेन्न, कामिनीजिज्ञासायाः कामिनीभिन्नविषयकज्ञानत्वं न प्रतिबध्यतावच्छेदकं कामिनीत्येतादृशज्ञानस्यापि कामिनीभिन्नकामिनीत्वतत्सम्बन्धादिविषयकतया तादृशज्ञानस्य कामिनीजिज्ञासादशायामनुदयप्रसङ्गात्, रूपविशिष्टकामिनीज्ञानं जायतामित्येतादृशेच्छाकालेऽपि रूपवती कामिनीत्येतादृशज्ञानानुदयप्रसङ्गाच्च, किन्तु कामिनीविषयित्वाभाववद्वृत्तिविषयताशालित्वमेव तथा, साक्षात् परम्परया वा कामिनीविषयतानिरूपिता या विषयता सा च न कामिनीविषयित्वाभाववद्वृत्तिरतः कामिनी रूपवतीत्यादिज्ञानीयरूपादिविषयताया अतथात्वान्नानुपपत्तिरित्थञ्च कामिनीजिज्ञासाकाले कामिनीमहं जानामीत्याकारककामिनीविषयित्वाभाववदवृत्त्यात्मत्वादिविषयताशालिज्ञानोत्पत्तौ बाधकाभावात् ।(४१)।**

---

"**आत्मत्वस्य भानं न सम्भवति**" इति। ननु कामिनीज्ञानं जायतामितीच्छात्मिकायाः कामिनीजिज्ञासाया अनन्तरं यत् कामिनीज्ञानं जायते तस्य "कामिनीज्ञानमहमिच्छामि" इत्याकारतास्वीकारे तत्र अहंपदार्थतावच्छेदकतया आत्मत्वस्य भानं भवेदित्याक्षेपनिरासाय हेतुमाह "**कामिनीजिज्ञासायाः कामिनीभिन्नविषयकज्ञाने विरोधित्वा**"दिति, तथा च कामिनीजिज्ञासोत्तरमानसे इच्छाया आत्मन आत्मत्वस्य च भानमसम्भवमिति बोध्यम्। "**अतः**" भानासम्भवात्। "**तदसंग्राहकतया**" तादृशकामिनीमानसे विषयितया वृत्तित्वविरहेण। "**आत्मत्वस्य विरोधिसामग्र्यभावजन्यतावच्छेदकत्वं न सम्भवति**" इत्ययं सुगमः शङ्काविषयः। "**नचे**"ति "**वाच्य**" मिति परेणान्वयः। "**क्षतिविरहः**" इति, तादृशमानसस्य विरोधिसामग्र्यभावजन्यतावच्छेदकीभूतेन आत्मत्वरूपधर्मेणाविशिष्टत्वे फलतो विरोधिसामग्र्यभावं विनैव तदुत्पत्तिसम्भवेन विरोधिसामग्रीसत्त्वेऽपि तादृशमानसापत्तिरूपा या सम्भाविता क्षतिस्तस्या "**विरहः**" तादृशी क्षतिर्न सम्भवतीत्यर्थः। क्षतिसम्भावनाविरहे हेतुमाह "**तत्रेच्छाया हेतुत्वेन**" इत्यादिना। "**तत्र**" विरोधिसामग्र्युत्तरतादृशमानसे, "**इच्छायाः**" तादृशमानसेच्छायाः, अन्यत् सुगमम्।

(४१) "अथे"त्यादिना प्रदर्शितां शङ्कां निरस्यति "**इति चेन्न**" इत्यादिना। "**तादृशज्ञानस्य**" कामिनीत्वप्रकारकज्ञानस्य। "**अनुदयप्रसङ्गा**"दिति। ननु कामिनीत्वं तत्सम्बन्धञ्चाविषयीकृत्य केवलकामिनीविषयकमेव मानसं तत्रोत्पद्यत इत्यभ्युपगमे तादृशज्ञानानुदयप्रसङ्गो वारयितुं शक्य इत्यतो दोषान्तरमाह "**रूपविशिष्टे**"त्यादिना। ननु कामिनीभिन्नविषयकज्ञानत्वं यदि कामिनीजिज्ञासायाः प्रतिबध्यतावच्छेदकं न भवितुमर्हति तर्हि कीदृशं नाम तत्प्रतिबध्यतावच्छेदकं विवक्षणीयमित्याक्षेपस्योत्तरमाह "**किन्तु**" इत्यादिना, "**कामिनीविषयित्वाभाववद्वृत्तिविषयताशालित्वमेव तथा**" कामिनीविषयिताशून्यज्ञानीयविषयतानिरूपकत्वमेव कामिनीजिज्ञासायाः प्रतिबध्यतावच्छेदकमित्यर्थः। "**साक्षात् परम्परया वे**"ति, अत्र साक्षादितिकथनाद् रूप-कामिनीत्वादि-विषयतायाः संग्रहः,

**आत्मत्वादेः प्रागनुपस्थितौ कामिनीमहं जानामीत्याकारकज्ञानं न सम्भवति विशिष्टबुद्धौ विशेषणधियो हेतुत्वात्, परन्तु तदंशे निर्विकल्पकमेव मानसमुत्पद्यते तच्च कामिनीजिज्ञासाप्रतिबध्यमेवात्मत्वनिरूपितनिर्विकल्पकीयविषयतायाः कामिन्यविषयकज्ञानसाधारण्यादिति तु नाशङ्कनीयम्, आत्मत्वादिविशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वे मानाभावात्, प्रथमत एवोक्तविशिष्टबुद्धिसम्भवात्, कामिनीविषयित्वाभाववद्वृत्तिविषयितायाः कामिनीजिज्ञासाप्रतिबध्यतावच्छेदकत्वे कामिनीजिज्ञासादशायामन्तरेणैव रूपविशिष्टकामिनीज्ञानं जायतामित्याकारेच्छां रूपवती कामिनीत्याकारकज्ञानापत्तिस्तु तथाविधज्ञाने रूपविशिष्टकामिनीज्ञानं जायतामित्येतादृशेच्छाविरहविशिष्टकामिनीजिज्ञासात्वादिना प्रतिबन्धकत्वान्तरकल्पनेनोभयवादिसमाधेयेति। सुषुप्त्यनन्तरं विनश्यदवस्थसन्निकर्षजन्यवह्न्यादिनिर्विकल्पोपनीतभानं पुनरप्रामाणिकमेवेति न तदसंग्राहकतयात्मत्वस्य न विरोधिसामग्रीप्रतिबध्यतावच्छेदकत्वमुपपद्यत इति फक्किकयोर्नावकाशः।(४२)।**

---

परम्परयेति कथनाच्च रूपत्वात्मादिविषयतानां संग्रहः। "**अतथात्वात्**" कामिनीविषयिताशून्यज्ञानवृत्तित्वाभावात्, "**नानुपपत्तिः**" रूपवती कामिनीत्याकारज्ञानस्यानुदयापत्तिर्न भवति, एतादृशज्ञानस्य निरुक्तप्रतिबध्यतावच्छेदकधर्मानाक्रान्तत्वात्, "**इत्थञ्च**" उक्तरीत्या प्रतिवध्यतावच्छेदकनिर्वाचने कृतेच। "**कामिनीजिज्ञासाकाले**" इत्यारभ्य "**बाधकाभावा**"**दि**त्यन्तेन ग्रन्थांशेन तादृशकामिनीमानसे आत्मत्वभानानुपपत्तिशङ्का निराकृता।

(४२) कामिनीजिज्ञासादशायां "**कामिनीमहं जानामी**"त्याकारमानसस्य प्रकारान्तरेणानुपपत्तिशङ्कां प्रदर्श्य तां निरस्यति "**आत्मत्वादेः प्रागनुपस्थितो**" इत्यादिना "**प्रथमत एवोक्तविशिष्टबुद्धिसम्भवात्**" इत्यन्तसन्दर्भेण, अत्र "**प्रथमत**" इत्यस्य पूर्वमात्मत्वज्ञानं विनापीत्यर्थः। अत्र शङ्कासमाधाने सुगमे। निरुक्तरीत्या कामिनीजिज्ञासानिरूपितप्रतिबध्यतावच्छेदककल्पने आपत्तिविशेषं प्रदर्श्य तन्निरासमाह— "**कामिनीविषयित्वाभाववद्वृत्ति**"इत्यादिना "**उभयवादिसमाधेये**"त्यन्तग्रन्थेन। पूर्वं (३३) चिह्नितमूलसन्दर्भे "**मानसस्थले लौकिकविषयतासम्बन्धेनात्मत्वमेव निवेश्यते**" इति ग्रन्थेनात्मत्वस्य विरोधिसामग्रीप्रतिबध्यतावच्छेदककोटौ निवेशः कृतः, तत्र काचिदेवं फक्किका भवितुमर्हति—सुषुप्त्यनन्तरं विनश्यदवस्थसन्निकर्षाद् वह्न्यादिनिर्विकल्पकज्ञानोत्पत्तौ तदनन्तरं वह्न्याद्युपनीतमानसस्वीकारे तादृशमानसे ज्ञानभानासम्भवेनात्मत्वस्यापि भानासम्भवाद् विरोधिसामग्रीकालेऽपि तादृशमानसं भवतु? प्रतिबध्यतावच्छेदकस्यात्मत्वस्य तत्साधारणत्वाभावादिति। तस्याः फक्किकायाः समाधानमाह "**सुषुप्त्यनन्तरम्**" इत्यादिना, "**न तदसंग्राहकतया आत्मत्वस्य न विरोधिसामग्रीप्रतिबध्यतावच्छेदकत्वमुपपद्यते**" इति, अत्र "तदसंग्राहकतया" सुषुप्त्यनन्तरस्थलीयस्योपनीतमानसस्य असंग्राहकतया, आत्म-

**यत्तु अनुमित्यन्यनिखिलमानसे आत्मत्वस्येव ज्ञानत्वस्यापि भानसम्भवात्, लौकिकविषयतासम्बन्धेन आत्मत्वं ज्ञानत्वं वा प्रतिबध्यतावच्छेदकं विरोधिसामग्र्या इत्यत्र विनिगमकाभाव इति, तदपि न, कृतेः साक्षात्कारात् पूर्वं नियमतो ज्ञानासम्भवात् ज्ञानत्वाविषयकस्यापि कृतिमानसस्य सम्भवात् तदसंग्राहकतया ज्ञानत्वस्य तथात्वासम्भवात् ।। (४३) ।।**

**न च कृतिसाक्षात्कारस्य विषयांशे उपनीतभानतया उपनायकज्ञानसत्ताया आवश्यकतया निखिलमानसे ज्ञानत्वभानं सम्भवतीति वाच्यम्, इच्छाकृत्योरुपनायकत्वोपगमाद् विनैवोपनायकज्ञानमुपनीतभानसम्भवाद् विवेचितञ्चान्यत्रैवं, विशिष्टवैशिष्ट्यबोधं प्रति इच्छाकृतिसाधारणेन विशेषणतावच्छेदकप्रकारकत्वेन संस्कारव्यावृत्तविशेषणतावच्छेदकप्रकारकतथाविधविजातीयगुणत्वेन वा हेतुत्वमतः कृतिमानसस्य विशिष्टवैशिष्ट्यबोधरूपत्वेऽपि न नियमतो विशेषणतावच्छेदकप्रकारकज्ञानापेक्षा ।**

**अस्तु वा कृतिमानसस्य नियमतो ज्ञानादिविषयकत्वं, तथापि सुखादि-**

---

त्वस्य विरोधिसामग्रीप्रतिबध्यतावच्छेदकत्वं नोपपद्यत इति "न" न वक्तुं शक्यमित्येवमन्वयलभ्यार्थः । कुतो न वक्तुं शक्यमित्याक्षेपनिरासकहेतुः प्रागेवोक्तः—"**अप्रामाणिकमेवेति**" इत्यन्तग्रन्थेन । "**फक्किकयो**"रिति, अत्र द्विवचनेन द्वे फक्किके बोद्धव्ये, तत्र एकेयं "**सुषुप्त्यनन्तर**"मित्यादिना इदानीमुक्ता, अपरा च (४०) चिह्नितमूलसन्दर्भे "**अथ कामिनीजिज्ञासाकालीने**"त्यादिना प्रागुक्ता, तयोः फक्किकयो"**र्नावकाशः**" इति, यथास्थानमेव यथायथं समाधानस्य प्रदर्शितत्वादिति भावः । एवञ्च स्वनिष्ठलौकिकविषयताकत्वसम्बन्धेन आत्मत्वमेव विरोधिसामग्रीप्रतिबध्यतावच्छेदकं सुवचम् ।

(४३) **यत्त्वित्यादि**, "**विनिगमकाभाव**" इति, तथा च विनिगमनाविरहेणात्मत्वज्ञानत्वयोर्द्वयोरपि विरोधिसामग्र्याः प्रतिबध्यतावच्छेदककोटौ तादृशसामग्र्यभावस्य जन्यतावच्छेदककोटौ च निवेशने गौरवमिति 'यत्तु'कल्पीयशङ्कातात्पर्यम्, तच्छङ्कानिरासायाह "**तदपि न, कृतेः साक्षात्कारात् पूर्वं नियमतो ज्ञानासम्भवादि**"त्यादि । अत्रादर्शपुस्तके "**तदपि न क्षतिः साक्षात्कारान्तरं नियमतो ज्ञानासम्भवात्**" इत्याकारकोऽस्पष्टकतिपयाक्षरः पाठ उपलभ्यते, स तु चिन्त्यः, मया तु पूर्वापरग्रन्थपर्यालोचनयार्थसङ्गत्यनुरोधेन किञ्चित्परिवर्तितरूप उक्तपाठो गृहीत इत्यत्र सम्यक्त्वनिर्णये सुधिय एव प्रमाणम् । "**ज्ञानत्वाविषयकस्यापि कृतिमानसस्य सम्भवात्**" इति, कृतिमानसात् पूर्वं ज्ञानस्य सत्त्वं यदि नापेक्षितं तर्हि ज्ञानाविषयकं कृतिमानसं सुलभमिति तन्मानसे ज्ञानत्वाविषयकत्वस्य सम्भवादित्यर्थः । "**तदसंग्राहकतया**" तादृशकृत्यादिमानसावृत्तितया, "**ज्ञानत्वस्य तथात्वासम्भवात्**" अत्र तथात्वं विरोधिसामग्रीप्रतिबध्यतावच्छेदकत्वं तस्यासम्भवात्, एवञ्च न विनिगमनाविरहाधीनगौरवशङ्कावकाश इति बोध्यम् ।

**मानसे न तन्नियमः, तत्पूर्वं नियमतो ज्ञानसत्त्वे मानाभावादिति न किञ्चिदेतत्** ।(४४)।

---

(४४) कृतेः साक्षात्कारात् पूर्वं नियमतो ज्ञानासम्भवादिति प्रागुक्तम्, तत्खण्डनाभिप्रायेणाशङ्कते "**न चेति**", "**वाच्य**"मिति परेणान्वयः। "**कृतिसाक्षात्कारस्य**" घटविषयककृतिमानहमित्याकारस्य कृत्यंशे लौकिकमानसस्य, "**विषयांशे उपनीतभानतया**" इति, अत्र विषयो घट स्तत्र तदानीं लौकिकसन्निकर्षाभावादुक्तकृतिसाक्षात्कारे तस्य घटरूपस्यांशस्य लौकिकविषयतया भानं न सम्भवतीति अगत्या तस्योपस्थितिरूपज्ञानलक्षणसन्निकर्षस्वीकार आवश्यक इति तदनन्तरं जायमाने कृतिसाक्षात्कारे घटांशे उपनीतभानस्वरूपता बोध्या, तथा च कृतिसाक्षात्कारे ज्ञानस्य ज्ञानत्वस्य च भानं नियमत एव सम्भवतीति शङ्कातात्पर्यम्। शङ्कां निरस्यति "**इच्छाकृत्योरुपनायकत्वोपगमादि**"त्यादिना, ज्ञानस्येवेच्छाकृत्योरपि विषयभासकत्वस्य दीधितिकारादिसम्मतत्वादिति भावः। "**विवेचितञ्चान्यत्रैव**"मिति, "अन्यत्र" स्वकृते ज्ञानलक्षणाविचाररहस्यनामकग्रन्थे, "**एवम्**" अनेन प्रकारेण, इच्छाकृत्योरपि उपनायकत्वमावश्यकमित्येवं प्रकारेणेति यावत्, "**विवेचितम्**" इति, एतद्ग्रन्थकारेण श्रीहरिरामतर्कवागीशेन मया स्वयमेव विस्तरेणालोचितमित्यर्थः। ननु कृतिसाक्षात्कारात् पूर्वं विषयोपनायकतया ज्ञानस्यानावश्यकत्वेऽपि तादृशसाक्षात्कारस्य घटादिविशिष्टवैशिष्ट्यावगाहितया विशेषणीभूतकृत्यंशे घटादेरवच्छेदकतया पूर्वं तत्प्रकारकज्ञानस्य तत्र नियमतोऽपेक्षा वर्तत एव, विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वादित्याकारशङ्कामपि निरस्यति "**विशिष्टवैशिष्ट्यबोधं प्रति**" इत्यादिना, "**विशेषणतावच्छेदकप्रकारकत्वेन**" इति, एतत्कल्पानुसरणे कारणतावच्छेदकीभुतविशेषणतावच्छेदकप्रकारकत्वस्य बहोः कालात् पूर्वं घटानुभवेन जनिते घटविषयकसंस्कारेऽपि वर्तमानतया तस्य च दीर्घकालस्थायितया इदानीमप्यसौ संस्कारस्तिष्ठति, एतद्दशायामिदानीं पटत्वेन पटज्ञानादनन्तरमुत्पद्यमाने "पटमहं जानामी"त्याकारविशिष्टवैशिष्ट्यावगाहिबोधे "घटपटावहं जानामीत्याकारताप्रसङ्ग इत्यस्वरसात् प्रकारान्तरमाह '**संस्कारव्यावृत्ते**"त्यादिना, भावनाख्यसंस्कारावृत्तीति तदर्थः। "**तथाविधविजातीयगुणत्वेने**"ति, "तथाविधम्" इच्छाकृत्यादिसाधारणं यद् "विजातीयगुणत्वम्" योग्यसविषयकत्वरूपं तेनेत्यर्थः। "**हेतुत्वमिति**", विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति कारणत्वम्, एतदपि दीधितिकारादीनां मतमालोचितं ग्रन्थकृता ज्ञानलक्षणाविचाररहस्यग्रन्थे। ननु इच्छाकृत्योरुपनायकत्वानुपगमे कृतिसाक्षात्कारस्थलेऽपि पूर्वमुपनायकज्ञानमावश्यकं तथा च तत्साक्षात्कारेऽपि ज्ञानस्य ज्ञानत्वस्य च भानं निराबाधमेवेति पर्यनुयोगस्य समाधानमाह "**अस्तु वा**" इत्यादिना। "**तथापि सुखादिमानसे न तन्नियमः**" इति, सुखादीत्यत्रादिपदेन दुःखस्य परिग्रहः 'अहं सुखी', 'अहं दुःखी'त्याकारे सुखादिसाक्षात्कारे ज्ञानस्य ज्ञानत्वस्य च भानं नावश्यकमित्यर्थः। तत्र हेतुमाह "**तत् पूर्वमि**"त्यादिना। "**इति**" अस्माद्धेतोः

**अथ एतावता प्रयासेन अनुमित्यन्यत्वनिवेशप्रयुक्तगौरवपरिहारः, तथापि व्याप्यत्वमते न लाघवसम्भवः, वह्न्याद्यनुमितिसामग्रीकाले घटादिमानसवारणाय तादृशमानसं प्रति अनुमितिसामग्र्याः प्रतिबन्धकत्वकल्पनाया उभयवादिसिद्धत्वात्, न हि भिन्नविषयकमानसे तत्प्रतिबन्धकताया उभयवादिसिद्धत्वेऽपि व्याप्यत्वमते समानविषयकमानसस्थलीयप्रतिबन्धकत्वाकल्पन एव लाघवमितीदानीं वक्तुं शक्यते, यतः स्वयमेव मानसस्थले विरोधिसामग्र्याः विषयभेदेन प्रतिबध्यप्रतिबन्धकभावभेदाभावो दर्शित इति चेन्न, अनुमितिसामग्रीदशायां व्याप्यत्वमते भिन्नविषयकमपि मानसमुत्पद्यते तावता क्षतिविरहात्, एवञ्च मानसं प्रति अनुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवं निराबाधमेव।(४५)।**

**न च वह्न्याद्यनुमितिदशायां घटादिमानसोपगमे तदुत्तरं घटं जानामीत्याकारकानुव्यवसायापत्तिरिति वाच्यम्, अनुमितिवृत्तिविषयतासम्बन्धेन तादृशानुव्यवसायं प्रति (विधेयोद्देश्यादिमुद्रया विषयतासम्बन्धेन घटादिविषयताविधेयतानिरूपकज्ञानानिरूपितघटादिविषयतात्वेनानुगमे एतादृशविषयतानिरूपकत्वेन व्यवसायस्यापि उक्तप्रत्यासत्त्या हेतुत्वोपगमात्, तादृशानु-**

---

"**न किञ्चिदेतत्**" अव्यवहितपूर्ववर्ति'यत्तु'कल्पे आत्मत्वं ज्ञानत्वं वा विरोधिसामग्र्याः प्रतिबध्यतावच्छेदकमित्यत्र विनिगमकाभाव इति यदुक्तं तदकिञ्चित्करमित्यर्थः।

(४५) "**अथे**"त्यादि, "**एतावता प्रयासेने**"ति प्रदर्शितयुक्तिजालैर्बहुविधाक्षेपनिरासपूर्वकमात्मत्वस्य विरोधिसामग्रीप्रतिबध्यतावच्छेदकत्वव्यवस्थापनेनेत्यर्थः। "**गौरवपरिहार**" इत्यस्मात् परं" "**यद्यपि सम्भवती**"त्यूह्यम्। तथापि "**न लाघवसम्भव**" इत्यस्य हेतुमाह "**वह्न्याद्यनुमितिसामग्रीकाले**" इत्यादिना, अत्र "सामग्रीकाले" इत्यस्य सामग्र्यव्यवहितोत्तरक्षणे इत्यर्थः। "**न हि**" इति "**वक्तुं शक्यत**" इति परेणान्वेति, कथं वक्तुं न शक्यत इत्यत्र हेतुमाह "**यत**" इत्यादिना, "**दर्शित**" इति, ३३, ३४, ३५, सङ्ख्याङ्कितमूलसन्दर्भेषु विचारपूर्वकं प्रतिपादित इति बोध्यम्। एवञ्च व्याप्यत्वमते न लाघवसम्भव इति शङ्कैव पर्यवस्यति, तां निरस्यति "**इति चेन्ने**"त्यादिना। "**तावता क्षतिविरहा**"दिति। अयं भावः—अनुमितित्वस्य मानसत्वविरुद्धतावादिमते भिन्नविषयकप्रत्यक्षं प्रत्यनुमितिसामग्र्याः प्रतिबन्धकत्वं शास्त्रसिद्धं, किन्तु व्याप्यतावादिमते मानसत्वस्यानुमितित्वव्यापकतया मानसत्वावच्छिन्नोत्पादकसामग्री अनुमितिसामग्रीव्यापिकेति अनुमितेः पूर्वं नियमत एव मानसत्वावच्छिन्नसामग्री वर्ततेति तदुत्तरं जायमाने वह्न्यनुमितिरूपज्ञाने मानसत्वस्यापि सत्त्वेन तत्र घटादिविषयकत्वाङ्गीकारे न कोऽपि सिद्धान्तविरोध इति। "**एवञ्च**" तादृशानुमित्यात्मकमानसे भिन्नविषयकत्वस्यापि स्वीकार्यत्वे चेत्यर्थः।

**मितेस्तद्विषयत्वनिरूपकतया तत्तद्विषयताया विधेयोद्देश्यमुद्रया आपत्त्यसम्भवात्, अनुमितिवृत्तिविषयताया अनुत्पत्त्यापि सामानान्यविषयतयाऽनुमितित्वज्ञानेषु अनुव्यवसायापत्तेः।*) विधेयोद्देश्यादिमुद्रया घटादिविषयतानिरूपकव्यवसायस्य हेतुत्वोपगमात्तादृशानुमितेस्तथाविधविषयत्वानिरूपकतया विधेयोद्देश्यादिमुद्रया घटादिविषयताकानुव्यवसायापत्त्यसम्भवात्। तत्र सामान्यविषयतासम्बन्धेन तथाविधानुव्यवसायापत्तिर्दुर्वारैवेति तु नाशङ्कनीयम्, यतोऽनुमितिभिन्नवृत्तिविषयतासम्बन्धेनानुव्यवसायं प्रति अनुमितिभेदस्य हेतुत्वान्तरं कल्प्यते, एवञ्चानुमितिवृत्तिविषयत्वतदन्यवृत्तिविषयत्वान्यतरसम्बन्धेनानुव्यसायोत्पादकसामग्रीसहकारेणैव सामान्यविषयतासम्बन्धेन कार्योत्पादकसामग्र्याः कार्योत्पादप्रयोजकत्वात्, प्रकृते च तादृशान्यतरसम्बन्धेन कार्योत्पादकसामग्र्या असत्त्वेनापत्त्यभावादिति।(४६)।**

**अथ निखिलमानसे आत्मत्वभानसम्भवे मानसत्वजातिरेवाप्रामाणिकी तदुपपादनीयप्रयोजनं ह्यात्मत्वेनैवोपपादयितुं शक्यते, एवञ्च मानसत्वावच्छिन्नं प्रति विरोधिसामग्र्याः प्रतिबन्धकत्वकल्पनं विरुद्धवादिमतेऽपि नास्तीति चेन्माभून्मानसत्वजातेः प्रामाणिकता एवमपि तदात्मत्वं प्रतिबध्यतावच्छेदकीकृत्य मानसस्थले विरोधिसामग्र्याः प्रतिबन्धकत्वकल्पनमावश्यकमेव, अन्यथा यादृशसामग्रीबलादसत्यामनुमितिसामग्र्यां घटमहं जानामीत्याकारकप्रत्यक्षत्वावच्छिन्नमुत्पद्यते तादृशसामग्र्यां सत्यामनुमितिसामग्र्या-**

---

(४६) "**न चे**"ति "**वाच्य**"मिति परेणान्वयः। "**तादृशानुव्यवसायं प्रति**" घटं जानामीत्याद्यनुव्यवसायं प्रति। "**विधेयोद्देश्यादिमुद्रया**" अत्रादिपदाद् विधेयतावच्छेदकोद्देश्यतावच्छेदकयोः परिग्रहः, मुद्राशब्दस्य भावार्थत्वम्, तृतीयाया अभेदोऽर्थः, तस्य च परवर्तिन्यां "**घटादिविषयतानिरूपकव्यवसायस्य**" इत्यत्रोल्लिखितायां घटादिविषयतायामन्वयः, तथा च विधेयत्वाभिन्ना विधेयतावच्छेदकत्वाभिन्ना वा उद्देश्यत्वाभिन्ना उद्देश्यतावच्छेदकत्वाभिन्ना वा या घटादिविषयता तन्निरूपकव्यवसायस्येति फलितार्थः। "**तादृशानुमिते**"र्वह्न्यनुमितेः। नन्वेवं तत्रानुमितिवृत्तिविषयतासम्बन्धेन तादृशानुव्यवसायासम्भवेऽपि सामान्यविषयतया स कथं न भवति इत्याक्षेपनिरासायाह "**तत्रे**"त्यादि, सुगमम्।

* **टिप्पनी** :—अत्रादर्शपुस्तकस्थः पाठः नितरामसङ्गतार्थक इति सुधीजनचिन्तायै बन्धनीचिह्नमध्ये तं स्थापयित्वा कथञ्चिद् ग्रन्थसङ्गतये तत्स्थले टीकाकृता परिवर्तिताकारः पाठः कल्पितः स च बन्धनीचिह्नादनन्तरं मूले गृहीतः। यथा:—"विधेयोद्देश्यादिमुद्रया घटादिविषयतानिरूपकव्यवसायस्यापि हेतुत्वोपगमात् तादृशानुमितेस्तथाविधविषयत्वानिरूपकतया विधेयोद्देश्यादिमुद्रया घटादिविषयताकानुव्यवसायापत्त्यसम्भवादि"ति।

**अक्षततया तदवच्छिन्नापत्तेर्ब्रह्मणापि वारयितुमशक्यत्वादिति, विरुद्धमते ज्ञानादिलौकिकप्रत्यक्षकाले तदनुमितिवारणाय लौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वकल्पनमधिकं, व्याप्यत्वमते तदानीमनुमितिस्वीकारे क्षतिविरहाद् युक्तं कल्पनलाघवम्, न च तदानीमनुमितिस्वीकारे तदनन्तरं ज्ञानमनुमिनोमीत्याकारकानुव्यवसायापत्तिरिति वाच्यं, तादृशानुव्यवसायं प्रति ज्ञानादिनिरूपितलौकिकविषयतायाः प्रतिबन्धकत्वोपगमादिति केचित्।(४७)।**

**अत्र केचिन्मानसादिकं प्रति नानुमितिसामग्र्याः प्रतिबन्धकताकल्पनमधिकं भिन्नविषयकचाक्षुषादिस्थलीयप्रतिबन्धकतयैवोपपत्तेस्तथा हि तादृशसामग्रीप्रतिबन्धकतायाञ्च न तदिच्छाया उत्तेजकत्वमुपगम्यते, अथ चाक्षुषत्वादिप्रकारकेच्छानां विशिष्योत्तेजकत्वानुरोधेन चाक्षुषत्वादीनां विशिष्य प्रतिबध्यतावच्छेदकत्वमापद्येतेति न चाक्षुषादिस्थलीयप्रतिबध्यप्रतिबन्धकतयै-**

---

(४७) अनुमितित्वं मानसत्वव्याप्यमिति पूर्वपक्षाश्रयिणं प्रति सिद्धान्ती प्रत्यवतिष्ठते "**अथे**"त्यादिना। "**अप्रामाणिकी**"त्यत्र हेतुमाह "**तदुपपादनीयप्रयोजनं हि**" इत्यादिना "**हि**" यतः, तया मानसत्वजात्या उपपादनीयं सम्पादनीयं यत् प्रयोजनं विरोधिसामग्रीनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यताया मानससामग्रीनिष्ठकारणतानिरूपितकार्यताया वा अनुगतधर्मावच्छिन्नत्वेन व्यवस्थापनरूपं तत् "**आत्मत्वेनैवोपपादयितुं शक्यते**" इति, उपपत्तिप्रकारश्च लौकिकविषयितासम्बन्धेनात्मत्वावच्छिन्नं प्रति मानससामग्री कारणं विरोधिसामग्री वा प्रतिबन्धिका इत्येवंरूपो बोध्यः। "**एवञ्च**" मानसत्वजातेरप्रामाणिकत्वे च। "**विरुद्धवादिमतेऽपि**" सिद्धान्तिमतेऽपि। "**नास्तीति चेत्**" तथा च व्याप्यतावाद्यपेक्षया सिद्धान्तिनां नास्ति कल्पनाधिक्यमिति यदि सिद्धान्तिभिः प्रत्यवस्थीयते तदा तत्र व्याप्यतावादिनामुत्तरं "**मा भू**"दित्यादि। "**आवश्यकमेव**" इति विरुद्धवादिसिद्धान्तिमतेऽपीति बोध्यम्। आवश्यकतां विवृणोति "**अन्यथे**"त्यादिना। "**यादृशसामग्रीबलात्**" ज्ञानसामान्यकारणसहकृतघटज्ञानकालीनतद्धर्मिकमनःसन्निकर्षात्मकयादृशसामग्रीवशात्। "**प्रत्यक्षत्वावच्छिन्न**"मिति उपनीतघटमानसप्रत्यक्षमित्यर्थः। "**तदवच्छिन्नापत्तेः**" तादृशोपनीतघटमानसप्रत्यक्षापत्तेरित्यर्थः। "**विरुद्धमते**" सिद्धान्तिमते, "**तदनुमितिवारणाय**" ज्ञानानुमितिवारणाय, "**क्षतिविरहात्**" इति (४५)चिह्नितटीकायामस्माभिः क्षतिविरहहेतुर्विवेचितः। "न चे"ति "वाच्यमि"त्यन्वयः। "**तदानीमनुमितिस्वीकारे**" यदा घटं जानामीत्याकारं घटज्ञानविषयकलौकिकमानसप्रत्यक्षमुत्पद्यते तदा घटज्ञानस्यानुमितिस्वीकारे, "**प्रतिबन्धकत्वोपगमादि**"ति, तथा च घटं जानामीति प्रत्यक्षकाले तादृशज्ञाननिरूपितलौकिकविषयतात्मकप्रतिबन्धकस्यात्मनि सत्त्वात्तत्र घटज्ञानमनुमिनोमीत्यनुव्यवसायापत्तिर्न भवितुमर्हतीति भावः। "**केचित्**" इत्युक्त्या अस्वरसः सूच्यते, स च व्याप्यतामते ईदृशप्रतिबध्यप्रतिबन्धकभावकल्पनागौरवात्मको बोध्यः।

**वोपपत्तिः स्यादिति चेत्तदेव न, इच्छाया उत्तेजकत्वस्य निष्प्रयोजनकत्वात्, न हि इच्छाया उत्तेजकत्वानभ्युपगमेऽनुमित्यादिसामग्रीकाले चाक्षुषेच्छासत्त्वे चाक्षुषाद्यनुपपत्तिरिति वक्तुं शक्यते, यतः सिद्ध्यभावविशिष्टपरामर्शत्वादिना न प्रतिबन्धकता अपितु लाघवात् स्वाव्यवहितपूर्वक्षणवृत्तित्वसम्बन्धेनानुमित्यादिमत्त्वेनैव, यदा चाक्षुषेच्छाविशिष्टा चाक्षुषसामग्री तदुत्तरक्षणे चानुमित्यनुदयादव्यवहितपूर्वक्षणवृत्तित्वसम्बन्धेनानुमितित्वावच्छिन्नं नास्तीति विनैवेच्छाया उत्तेजकत्वेन चाक्षुषाद्युपपत्तिः, एवञ्च चाक्षुषादिस्थलीयप्रतिबन्धकतायां सर्वप्रत्यक्षसाधारणस्य अनुमित्यन्यज्ञानत्वस्य प्रतिबध्यतावच्छेदकत्वं सम्भवतीति न मानसस्थले प्रतिबन्धकतायाः कल्पनमावश्यकमिति ।(४८)।**

---

(४८) कल्पनालाघवगौरवविषये व्याप्यतावादानुसारिणामन्येषां मतमुत्थापयति "**अत्र केचित्**" इत्यादिना। "**भिन्नविषयकचाक्षुषादिस्थलीयप्रतिबन्धकतयैवोपपत्ते**"रिति, भिन्नविषयकप्रत्यक्षं प्रति अनुमितिसामग्री प्रतिबन्धिकेति प्रसिद्धप्रतिबध्यप्रतिबन्धकभावेनैवाभिमतसिद्धेरित्यर्थः। "**तादृशसामग्रीप्रतिबन्धकतायाञ्च**" अनुमितिसामग्रीनिष्ठप्रतिवन्धकतायाञ्च । "**तदिच्छाया**"मानसेच्छायाः, उत्तेजकत्वं नोपगम्यते इत्यन्वयः। शङ्कते "**अथे**"त्यादिना। "**चाक्षुषत्वादीनां विशिष्य प्रतिबध्यतावच्छेदकत्वमापद्येत**" इति। अयं भावः—चाक्षुषत्वावच्छिन्नं प्रति चाक्षुषत्वप्रकारकेच्छाविरहविशिष्टाया अनुमितिसामग्र्याः प्रतिबन्धकत्वमिति रीत्या प्रतिबध्यप्रतिबन्धकभावे पृथक् कल्पनीये सति मानसं प्रत्यपि पृथगेव प्रतिबन्धकता वाच्या। "**इति**" अस्माद्धेतोः। शङ्कां खण्डयति "**तदेव न**" इत्यादिना, चाक्षुषत्वादीनां विशिष्य प्रतिबध्यतावच्छेदकत्वं नैवापद्येत इति तदर्थः। तत्र हेतुमाह "**इच्छाया**" इत्यादिना, इच्छाया उत्तेजकत्वस्य निष्प्रयोजनकत्वे युक्तिमाह "**न हि**" इत्यादिना, 'न हि' इत्यस्याग्रे "**वक्तुं शक्यते**" इत्यनेनान्वयः। "**सिद्ध्यभावविशिष्टपरामर्शत्वादिना न प्रतिबन्धकता**" इति, भिन्नविषयकचाक्षुषादिकं प्रति अनुमितिसामग्र्या या प्रतिबन्धकता सा निरुक्तपरामर्शत्वेन न वाच्या, शाब्दसामग्र्या या प्रतिबन्धकता सा चाकाङ्क्षाज्ञानादिविशिष्टपदार्थोपस्थितित्वेन न वाच्या इति तदर्थः, तर्हि केन रूपेण वाच्या ? इत्यनुयोगस्य समाधानमाह "**अपितु**" इत्यादिना। "**लाघवादि**"ति सिद्ध्यंशे सिषाधयिषाया उत्तेजकत्वेन विशेष्यविशेषणभावादौ विनिगमनाविरहादिना च सिद्ध्यभावविशिष्टपरामर्शत्वेन प्रतिबन्धकत्वे गौरवातिशयः स्यात्तदपेक्षया लाघवादित्यर्थः। "**स्वाव्यवहितपूर्वक्षणवृत्तित्वसम्बन्धेनानुमित्यादिमत्त्वेनैवे**"ति। "**स्वम्**" अनुमित्यादिकम्, आदिपदेन शाब्दबोधस्य परिग्रहः, एवञ्चानुमित्यन्यज्ञानत्वावच्छिन्नं प्रति स्वाव्यवहितपूर्वक्षणवृत्तित्वसम्बन्धेनानुमितिमत्त्वेन प्रतिबन्धकत्वम्, शाब्दान्यज्ञानत्वावच्छिन्नं प्रति निरुक्तसम्बन्धेन शाब्दबोधवत्त्वेन प्रतिबन्धकत्वमिति रीत्या प्रतिबध्यप्रतिबन्धकभाव इति हृदयम्। इच्छाया उत्तेजकत्वानभ्युपगमे पूर्वं यादृशदोष आशङ्कित इदानीं तस्य

**तदत्यन्तमशुद्धम्, इच्छाया अनुत्तेजकत्वे घटादिचाक्षुषेच्छाविशिष्टतत्सामग्रीदशायां वह्न्याद्यनुमितिसामग्रीसत्त्वेऽनुमित्यनुत्पादचाक्षुषाद्युत्पादयोः परस्पराधीनतयान्योन्याश्रयप्रसङ्गात्। तथा हि तुल्ययुक्त्या भिन्नविषयकानुमितिं प्रतीच्छाविशिष्टचाक्षुषादिसामग्र्या अपि चाक्षुषादिमत्त्वेनैव प्रतिबन्धकता वाच्या, एवञ्च प्रकृतस्थले चाक्षुषादिकञ्चेन्नोत्पद्यते तदा तादृशप्रतिबन्धकासत्त्वेनानुमित्युत्पत्तौ बाधकाभावादनुमित्यात्मकमुत्पद्यत एव, चाक्षुषादिकमुत्पद्यत इति चेत्तादृशप्रतिबन्धकसमवधानेन नोत्पद्यतेऽनुमित्यादिकम्, अतस्तदनुत्पादस्तदा चाक्षुषाद्युत्पादाधीन एव, चाक्षुषाद्युत्पादोऽनुमित्यनुत्पादाधीन एव, तदुत्पादे उक्तप्रतिबन्धकसत्त्वेन तदसम्भवादिति। इच्छाया उत्तेजकत्वे च तदानीं चाक्षुषाद्युत्पादो नानुमित्यनुत्पादाधीनः, तदुत्पत्तावपि इच्छारूपोत्तेजकसत्त्वेन चाक्षुषाद्युत्पादस्यावश्यकत्वात्, किन्त्विच्छाधीन एवेति नान्योन्याश्रयप्रसक्तिरितीच्छाया उत्तेजकत्वमावश्यकमेव।(४६)।**

---

समाधानं दर्शयितुमाह "**यदा**" इत्यादि, सुगमम्। "**एवञ्च**" उक्तरीत्या प्रतिवध्यप्रतिबन्धकभावकल्पनयैवोपपत्तिसम्भवे च।

(४६) "**अत्र केचित्**" इत्यादिना प्रदर्शितं समाधानं खण्डयति "**तदत्यन्तमशुद्धम्**" इत्यादिना, 'अशुद्धमि'त्यस्य असमीचीनमित्यर्थः। असमीचीनत्वं प्रतिपादयितुमाह "**इच्छाया अनुत्तेजकत्वे**" इत्यादि, "**घटादिचाक्षुषेच्छाविशिष्टतत्सामग्रीदशायाम्**" इत्यस्य यस्य पुरुषस्य यदा घटादिचाक्षुषेच्छा घटादिचाक्षुषसामग्री च वर्तेते तदा इत्यर्थः, अत्र 'घटादी'त्यनेन वह्निभिन्नं यत् किमपि चाक्षुषयोग्यं वस्तु बोध्यम्। "**वह्न्याद्यनुमितिसामग्रीसत्त्वे**" अत्र 'वह्न्यादी'त्यनेन यद्विषयकचाक्षुषेच्छाविशिष्टचाक्षुषसामग्री वर्तते तद्भिन्नं वस्तु ज्ञातव्यम्, तथा च तस्य पुरुषस्य भिन्नविषयकानुमितिसामग्रीसत्त्वे इति तदर्थः। "**परस्पराधीनतया अन्योन्याश्रयप्रसङ्गात्**" इति, अत्र विषययोः परस्परसापेक्षत्वेन तद्ग्रहयोरपि परस्परसापेक्षत्वपर्यवसानादनुमित्यनुत्पादग्रहसापेक्षो यश्चाक्षुषाद्युत्पादग्रहस्तत्सापेक्षः पुनरनुमित्यनुत्पादग्रह इति रीत्या अन्योन्याश्रयो बोध्यः। अनुमित्यनुत्पादचाक्षुषाद्युत्पादयोः परस्पराधीनत्वं स्फुटीकर्तुमाह "**तथा हि**" इत्यादि। "**तुल्ययुक्त्या**" लाघवात्मकयुक्तेस्तुल्यतया। "**चाक्षुषादिमत्त्वेनैव**" स्वाव्यवहितपूर्वक्षणवृत्तित्वसम्बन्धेन चाक्षुषादिविशिष्टत्वेनैवेत्यर्थः, अत्र स्वं चाक्षुषादिकम्। "**एवञ्च**" प्रतिबन्धकताद्वयस्य निरुक्तरीत्या कल्पने च। "**प्रकृतस्थले**" घटादिचाक्षुषेच्छाविशिष्टतत्सामग्रीदशायां वह्न्याद्यनुमितिसामग्रीसत्त्वस्थले। **चाक्षुषादिकञ्चेन्नोत्पद्यते**" इति तु परस्पराधीनत्वप्रदर्शनाय वितर्कमात्रमवतारितम्, वस्तुगत्या तु तत्र चाक्षुषमेवोत्पद्यते इति बोध्यम्। "**तदुत्पादे**" अनुमितेरुत्पत्तौ सत्याम्। "**उक्तप्रतिबन्धकसत्त्वेन**" स्वाव्यवहितपूर्वक्षणवृत्तित्वसम्बन्धेनानुमितिमत्त्वावच्छिन्नरूपप्रतिबन्धकसत्त्वेन। "**तदसम्भ-**

**वस्तुतोऽनुमित्यादिमत्त्वेन प्रतिबन्धकत्वमेवासम्भवदुक्तिकम्, अव्यवहितपूर्वक्षणवृत्तित्वसम्बन्धेनानुमित्यादिमतः परामर्शादेरनुमित्युत्पत्तिक्षणादावपि सत्त्वेन तदनन्तरमनुमित्यनुव्यवसायाद्यनुपपत्तेः। अथानुमित्युत्पत्तिक्षणेऽनुमित्यव्यवहितपूर्वक्षणासत्त्वेन तद्घटितसम्बन्धेन अनुमितिविशिष्टस्यासत्त्वेन विशिष्टाभावः सुलभ इति नानुपपत्तिरिति चेत् तादृशसम्बन्धेनानुमितिविशिष्टं तर्हि पूर्वक्षणेऽपि न वर्तते तदानीं विशेषणीभूताया अनुमितेरसत्त्वादिति तादृशविशिष्टाधिकरणत्वमेवाप्रसिद्धम्। स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेन वा प्रतिबन्धकत्वमित्यपि क्षणत्वस्यानुगतस्य निर्वक्तुमशक्यतयाऽनुपादेयमेवेत्यलमसदावेशेन।(५०)।**

---

वात्" चाक्षुषाद्युत्पादासम्भवात्। इच्छाया उत्तेजकत्वपक्षे तु नोक्तरीत्या अन्योन्याश्रय इत्याह "**इच्छाया उत्तेजकत्वे च**" इत्यादिना। "**तदुत्पत्तावपि**" अनुमितेरुत्पत्तावपि। "**इच्छारूपोत्तेजकसत्त्वेन चाक्षुषाद्युत्पादस्यावश्यकत्वात्।**" अत्रायमभिप्रायः—यत्र प्रथमक्षणे पर्वतो वह्निव्याप्यधूमवान् घटचाक्षुषं मदिष्टसाधनञ्चेत्याकारोऽपेक्षाबुद्ध्यात्मकः समूहालम्बनः स्मरणात्मकपरामर्शः, द्वितीयक्षणे घटचाक्षुषं मे जायतामितीच्छा, तृतीयक्षणे पर्वते वह्न्यनुमितिः घटस्य चाक्षुषसामग्रीसमवधानञ्च, तत्र चतुर्थक्षणे अनुभवसिद्धं यद् घटचाक्षुषं तत्तु न अनुमित्यनुत्पादाधीनं तत्पूर्वमनुमित्यनुत्पादस्यासत्त्वात्, अपितु इच्छाधीनमेव। न च तदानीं चाक्षुषेच्छासत्त्वेऽपि तदघटितस्वसामग्रीबलादेव चाक्षुषोत्पादसम्भवे इच्छाधीनत्वमपि तत्र नास्तीति वाच्यम्, तृतीयक्षणेऽपि स्वाव्यवहितपूर्वक्षणवृत्तित्वसम्बन्धेनानुमितिमत्त्वावच्छिन्नस्य भिन्नविषयकानुमितिसामग्रीरूपप्रतिबन्धकस्य सत्त्वादिच्छां विना तत्र चाक्षुषासम्भवादत इच्छाया उत्तेजकत्वमवश्यमेव स्वीकार्यम्।

(५०) "**वस्तुत**" इत्यादि। "**असम्भवदुक्तिकम्**" वक्तुमशक्यम्। तत्र हेतुमाह "**अव्यवहितपूर्वक्षणे**"त्यादिना। "**तदनन्तरम्**" तादृशानुमितिविशिष्टपरामर्शरूपप्रतिबन्धकानन्तरम्। "**अनुमित्यनुव्यवसायाद्यनुपपत्तेः**" तादृशानुव्यवसायस्य भिन्नविषयकमानसप्रत्यक्षस्वरूपतया तस्यापि निरुक्तानुमितिविशिष्टपरामर्शादिप्रतिबध्यतया तादृशानुव्यवसायस्यानुत्पादप्रसङ्गादित्यर्थः। "**अथे**"त्यादिः "**तादृशविशिष्टाधिकरणत्वमेवाप्रसिद्धम्**" इत्यन्तो मूलसन्दर्भः सुगमः। अप्रसिद्धत्वादिदोषेण प्रागुक्तरीत्या प्रतिबन्धकत्वकल्पनाया असम्भवात् प्रकारान्तरेण प्रतिबन्धकत्वकल्पनायै चेष्टते "**स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेन वा प्रतिबन्धकत्वम्**" इति, अत्र स्वं परामर्शादिकम्, तस्याव्यवहितोत्तरक्षणे उत्पत्तिर्यस्याः सा स्वाव्यवहितोत्तरक्षणोत्पत्तिका, तथाविधा अनुमितिर्यस्य स स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकः, स च स्वपदग्राह्यपरामर्शादिर्बोध्यः। यद्वा स्वाव्यवहितोत्तरक्षणोत्पत्तिकेत्यंशे स्वस्याव्यवहितोत्तरः स्वाव्यवहितोत्तरः, तथाविधः क्षणो यस्याः सा स्वाव्यवहितोत्तरक्षणा तथाविधा उत्पत्तिर्यस्याः सा स्वाव्यवहितोत्तरक्षणोत्पत्तिकेति रीत्या समासः, तथा च व्यधिकरणबहुव्रीहिं विनाप्युपपत्तिरिति बोध्यम्।

**इयं पुनः सिद्धान्तानुसारिणी युक्तिः कुत्रचित् विरोधिसामग्रीप्रतिबन्धकताया उत्तेजकत्वं नोपगम्यते अन्यथा विषयादिभेदेन प्रतिबन्धकताभेदापत्तेः किन्त्विच्छाधीनज्ञाने व्यभिचारवारणाय स्वविषयत्वस्ववृत्तिकृतिमत्त्वस्वसामानाधिकरण्यैतत्त्रितयसम्बन्धेनेच्छावदन्यत्वं कार्यतावच्छेदककोटौ निवेश्यते, भवति च घटचाक्षुषं जायतामित्येतादृशेच्छाधीनं घटचाक्षुषादिकम् एतादृशत्रितयसम्बन्धेनेच्छाविशिष्टम् अतो न तत्र विरोधिसामग्र्यभावहेतुतायां व्यभिचारः, स्पार्शनादिगोचरेच्छाव्यवहितोत्तरक्षणोत्पत्तिकस्य चाक्षुषादेः संग्रहाय सम्बन्धमध्ये विषयताप्रवेशः, इच्छानाशोत्तरोत्पन्नज्ञानसंग्रहाय द्वितीयदलप्रवेशः कृतः, स्ववृत्तित्वं तद्वत्त्वञ्च कालिकसम्बन्धेन, इच्छानाशोत्तरं जायमाने च न तदिच्छावृत्तिकृतिमत्त्वं, कृतेर्द्विक्षणमात्रावस्थायितया तदधिकरणक्षणे तादृशकृतेरभावात्, एकक्षणवृत्त्योरेव च कालिकसम्बन्धवत्वसम्भवात्। एकपुरुषीयचाक्षुषेच्छाव्यवहितोत्तरक्षणोत्पन्नतच्छून्यपुरुषान्तरीयचाक्षुषसंग्रहाय तृतीयदलप्रवेशः। न च विरोधिसामग्रीकाले चेच्छासत्त्वे यादृशसामग्रीबलाच्चाक्षुषादिकम् इच्छाशून्यकालेऽपि तादृशसामग्री वर्तते इत्याशङ्कनीयम्, इच्छाकालीनचाक्षुषादौ इच्छाया हेतुत्वोपगमात्, एवञ्च चाक्षुषादिस्थलेऽनुमितिसामग्र्याः प्रतिबध्यतावच्छेदकं न चाक्षुषत्वादिकम्, अपितु मानससाधारणमनुमित्यन्यज्ञानत्वमेवेति न विरुद्धमतेऽपि मानसस्थलेऽनुमितिसामग्रीप्रतिबन्धकत्वकल्पनाधिक्यम्।(५१)।**

---

भिन्नविषयकचाक्षुषादिप्रत्यक्षं प्रति तथाविधानुमितिकत्वेन प्रतिबन्धकत्वमिति भावः, एतत्कल्पमपि दूषयति "**क्षणत्वस्यानुगतस्ये**"त्यादिना।

(५१) "**कुत्रचित्**" कस्याञ्चिदपीच्छायाम्। "**विरोधिसामग्रीप्रतिबन्धकताया उत्तेजकत्वम्**"विरोधिसामग्रीनिष्ठप्रतिबन्धकतानिरूपितोत्तेजकत्वं "**नोपगम्यते**" इति शेषः।

"**अन्यथा**" इच्छाया उत्तेजकत्वोपगमे। "**विषयादिभेदेन**" चाक्षुषस्पार्शनादिविषयभेदेन तत्तत्पुरुषभेदेन च। "**प्रतिबन्धकताभेदापत्ते**"रिति, प्रतिबन्धकताभेदनिबन्धनगौरवप्रसङ्गादित्यर्थः। "**व्यभिचारवारणाये**"ति। विरोधिसामग्रीदशायामिच्छावशादुत्पद्यमाने चाक्षुषादिकार्ये तत्पूर्वं विरोधिसामग्र्यभावरूपकारणस्याभावेन प्रसक्तस्य व्यतिरेकव्यभिचारस्य वारणायेत्यर्थः।

"**स्वविषयत्वे**"त्यादिदलत्रये स्वम् इच्छा, "**एतत्त्रितयसम्बन्धेनेच्छावदन्यत्व**"मिति, उक्तत्रितयसम्बन्धेनेच्छाविशिष्टं यत् तद्भिन्नत्वमित्यर्थः। "**कार्यतावच्छेदककोटौ**" विरोधिसामग्र्यभावनिष्ठकारणतानिरूपितकार्यतावच्छेदकदले, यादृशव्यभिचारवारणायोक्तरीत्या कार्यतावच्छेदकदलं विशेषितं तादृशव्यभिचारवारणमिदानीं प्रदर्शयति "**भवति च**"

**अथानुमितिसामग्र्याश्चाक्षुषादिस्थलीयप्रतिबध्यतावच्छेदककोटौ भिन्नविषयकत्वमवश्यं निवेशनीयम्, अन्यथा समानविषयकलौकिकचाक्षुषादौ व्यभिचारप्रसङ्गात्। एवञ्च (न?) तादृशप्रतिबन्धकतयाऽनुमितिसामग्रीकाले**

---

इत्यादिना, "**एतादृशत्रितयसम्बन्धेनेच्छाविशिष्ट**"मिति। तथा च प्रागुक्तत्रितयसम्बन्धेनेच्छाविशिष्टे घटचाक्षुषे तादृशेच्छावदन्यत्वरूपकार्यतावच्छेदकधर्मावच्छिन्नत्वं नास्तीति तादृशघटचाक्षुषं प्रति विरोधिसामग्र्यभावस्य हेतुतापि न वर्तत इति न तत्र व्यभिचार इति बोध्यम्। उक्तसम्बन्धत्रयस्य क्रमेण प्रयोजनं दर्शयति "**स्पार्शनादौ**"त्यादिना। प्रथमसम्बन्धानुक्तौ यत्र प्रथमक्षणे पर्वतो वह्न्यभाववानिति बाधनिश्चयः, द्वितीयक्षणे पर्वतो वह्निव्याप्यधूमवानिति परामर्शः, तृतीयक्षणे घटस्पार्शनं मदिष्टसाधनमिति स्मरणं घटस्य चाक्षुषसामग्रीसमवधानञ्च, चतुर्थक्षणे घटस्य स्पार्शनेच्छा, तत्काले घटचाक्षुषं न सम्भवति, विरोधिन्या इच्छासामग्र्याः सत्त्वात्, तत्र पञ्चमक्षणे यद् घटचाक्षुषमुत्पद्यते तस्य स्ववृत्तिकृतिमत्त्व-स्वसामानाधिकरण्यैतदुभयसम्बन्धेन तादृशस्पार्शनेच्छाविशिष्टतया इच्छावदन्यत्वरूपकार्यतावच्छेदकधर्मानाक्रान्तत्वेन चतुर्थक्षणे तच्चाक्षुषस्यापत्तिः स्यात् तत्र विरोधिसामग्र्यभावस्याहेतुत्वात्, अतस्तथाविधस्य चाक्षुषादेः "**संग्रहाय**" कार्यतावच्छेदकधर्मवत्त्वेन लाभाय, "**विषयताप्रवेशः**" स्वविषयत्वदलप्रवेशः, तथा च तत्र तादृशघटचाक्षुषे स्पार्शनेच्छारूपं यत् स्वं तद्विषयत्वाभावादेव निरुक्तत्रितयसम्बन्धेन तादृशस्पार्शनेच्छावदन्यत्वसत्त्वेन कार्यतावच्छेदकधर्माक्रान्ततया चतुर्थक्षणे तदापत्तिर्न सम्भवति, तत्पूर्वक्षणे इच्छासामग्री-वह्न्यनुमितिसामग्र्यात्मकप्रतिबन्धकसत्त्वादिति बोध्यम्। द्वितीयसम्बन्धनिवेशप्रयोजनमाह "**इच्छानाशोत्तरोत्पन्नज्ञानसंग्रहाय**" इत्यादि, यस्य जनस्य पूर्वं कदाचिद् घटस्य चाक्षुषेच्छा जाता, तत इदानीं तस्य प्रथमक्षणे वह्नेरनुमितिसामग्री घटस्य चाक्षुषसामग्री च युगपत् संघटिते, द्वितीयक्षणे तस्य वह्न्यनुमितिरेव जायते, न तु घटचाक्षुषम्, भिन्नविषये प्रत्यक्षं प्रति अनुमितिसामग्र्या विरोधित्वात्, ततश्चतुर्थक्षणादौ स्वसामग्रीबलादुत्पत्स्यमानस्य तदीयघटचाक्षुषस्य विरोधिसामग्र्यभावकार्यतावच्छेदकधर्मवत्त्वेन लाभाय स्ववृत्तिकृतिमत्त्वरूपद्वितीयसम्बन्धो निवेशितः। अन्यथा द्वितीयक्षणेऽपि तस्य घटचाक्षुषस्यापत्तिः स्यादिति भावः।

"**तदधिकरणक्षणे**" इच्छानाशोत्तरोत्पन्नचाक्षुषाद्यधिकरणक्षणे। "**तादृशकृतेरभावात्**" इच्छाकालीनकृतेरसत्त्वादित्यर्थः। "**एकपुरुषीये**"त्यादि सुगमम्। "**न चे**"ति "**आशङ्कनीय**"मिति परेणान्वेति। "**एवञ्चे**"ति अनुमितिसामग्र्यभावकार्यतावच्छेदकदलस्य निरुक्तरीत्या परिष्कारे कृते च इति तदर्थः। "**अपितु मानससाधारणमनुमित्यन्यज्ञानत्वमेव**" इति, "अनुमितिसामग्र्याः प्रतिबध्यतावच्छेदक"मिति पूर्वेणान्वयः, तथा च प्रागुक्तत्रितयसम्बन्धेनेच्छाविशिष्टान्यत्वे सति अनुमित्यन्यज्ञानत्वमेवानुमितिसामग्र्याः प्रतिबध्यतावच्छेदकं तत्सामग्र्यभावस्य कार्यतावच्छेदकञ्चेति फलितार्थः।

**समानविषयकमानसं दुर्वारमिति चेन्न, भिन्नविषयकचाक्षुषादिस्थलीयप्रतिबन्धकतया समानविषयकमानसवारणासम्भवेऽपि समानविषयकचाक्षुषोपनीतभानवारणानुरोधेनानुमितिसामग्र्यास्तत्प्रतिबन्धकत्वान्तरकल्पनावश्यकत्वात्, तत्रैव लौकिकान्यप्रत्यक्षत्वस्य मानससाधारणस्य प्रतिबध्यतावच्छेदकत्वोपगमेनानुमितिसामग्रीकाले मानसवारणसम्भवात्।(५२)।**

**यच्चोक्तमनुमितित्वस्य प्रत्यक्षत्वविरुद्धत्वेऽनुमितिस्थले विशेषणतावच्छेदकप्रकारकज्ञानकारणताधिक्यमिति, तदप्यकिञ्चित्करं नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे क्षतिविरहेणैव ज्ञानत्वस्यैव तज्जन्यतावच्छेदकत्वात् प्रत्यक्षस्थलीयकार्यकारणभावकल्पनयैवोपपत्तेः।(५३)।**

**वस्तुतस्तु अनुमितेर्विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकाना-**

---

(५२) शङ्कामुत्थापयति "**अथे**"त्यादिना, "**अन्यथा**" भिन्नविषयकत्वानिवेशे। "**व्यभिचारप्रसङ्गात्**" इति, समानविषयकानुमितिसामग्रीकाले लौकिकसन्निकर्षादिरूपचाक्षुषादिसामग्रीसत्त्वेऽपि समानविषयकचाक्षुषादेरनुत्पादप्रसङ्गादित्यर्थः। "**एवञ्च न तादृशप्रतिबन्धकतया**" इति आदर्शपुस्तकस्थो मूलपाठः, अत्र "न" इत्यस्यासङ्गतार्थकतया वन्धनीमध्ये स्थापना कृता। शङ्कां निरस्यति "**इति चेन्ने**"त्यादिना, "**समानविषयकचाक्षुषोपनीतभानवारणानुरोधेन**" इत्यत्रादर्शपुस्तके "**मानसविषयचाक्षुषोपनीतभानानुरोधेने**"-त्याकारः पाठो दृश्यते तस्यार्थसङ्गतिविरहेण तत्स्थले यथामति परिवर्तिताकारः प्रागुल्लिखितः पाठः कल्पितः। "**तत्प्रतिबन्धकत्वान्तरकल्पनावश्यकत्वादि**"त्यत्र तस्य समानविषयकचाक्षुषोपनीतभानस्य तादृशोपनीतमानं प्रतीति यावत्। "**प्रतिबन्धकत्वान्तरकल्पनायाः**", प्रागुक्तप्रतिवन्धकत्वापेक्षया पृथक्प्रतिबन्धकत्वकल्पनायाः, 'आवश्यकत्वा'दवश्यं कर्तव्यत्वात्। "**तत्रैव**" तादृशपृथक्प्रतिबन्धकत्वकल्पनायामेव, "**लौकिकान्यप्रत्यक्षत्वस्ये**"त्यादि, तथा च लौकिकान्यप्रत्यक्षत्वावच्छिन्नं प्रति अनुमितिसामग्री प्रतिबन्धिकेति पृथक्कल्पनयैव सर्वं सुसमञ्जसमिति भावः।

(५३) अनुमितित्वस्य प्रत्यक्षत्वव्याप्यतावादिभिराशङ्कितं दोषान्तरं स्मारयित्वा तन्निरस्यति "**यच्चोक्त**"मित्यादिना, अत्र किमुक्तमिति विस्तरेण परिज्ञानाय (३२) चिह्नितमूलसन्दर्भस्यान्तिमांशे पूर्वपक्षवादिनामुक्तिरनुसन्धेया, तेषामुक्तेरकिञ्चित्करत्वं प्रतिपादयति "**नित्यसाधारणधर्मस्ये**"त्यादिना, "**क्षतिविरहेणैवे**"ति, अयं भावः—ईश्वरज्ञानसाधारणस्य विशिष्टवैशिष्ट्यावगाहिज्ञानत्वस्य जन्यतातिप्रसक्ततया तत्र जन्यतानिरूपितमनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं न तिष्ठतु, स्वरूपसम्बन्धरूपावच्छेदकत्वस्य तत्र सत्त्वे कापि क्षतिर्न सम्भवति, अतः "**ज्ञानत्वस्यैव**" विशिष्टवैशिष्ट्यावगाहिज्ञानत्वस्यैव, "**तज्जन्यतावच्छेदकत्वात्**" विशेषणतावच्छेदकप्रकारकज्ञाननिष्ठकारणतानिरूपितकार्यतावच्छेदकत्वात्, "**उपपत्तेः**" इति, अनुमितेरपि निरुक्तजन्यतावच्छेदकधर्मेणैव संग्रहादित्यर्थः।

**क्रान्तत्वेऽपि क्षतिविरहः, इतरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववतीत्याकारकान्वयव्याप्त्यनवगाहिपरामर्शदशायामन्वयव्याप्त्यवगाहिपरामर्शरूपकारणविरहेणैव पृथिवीतरभेदवतीत्याकारकविशिष्टवैशिष्ट्यावगाह्यनुमितेरुत्पादयितुमशक्यत्वात्। न च तादृशपरामर्शं विनापि स्वातन्त्र्येणैवेतरभेदत्वप्रकारकज्ञानदशायां व्यतिरेकपरामर्शात् विशिष्टवैशिष्ट्यबोधात्मकानुमितेरुत्पत्त्या तादृशपरामर्शविरहोऽकिञ्चित्कर इति वाच्यं, तदानीं केवलं विशेष्ये विशेषणमितिरीत्या पृथिवीतरभेदवतीत्याकारकानुमितेरुपगमात्। अथ एवं सति इतरभेदत्वप्रकारकज्ञानशून्यकालेऽपि व्यतिरेकपरामर्शात् पृथिवीतरभेदवतीत्याकारिकायाः केवलं विशेष्ये विशेषणमिति न्यायेनानुमितेरापत्तिरुक्तस्थले तथाविधानुमितेः प्रसिद्धत्वात्, तादृशानुमितिस्थले च विशेषणज्ञानस्यापि हेतुताया अक्लृप्तत्वात्, तद्विरहस्याकिञ्चित्करत्वात् इति चेदिष्यत एव तत्र तथाविधानुमितिः। अथैवं साध्यविशेष्यकानुमितिर्विलीयते इति चेद् विलीयतां किमपचयः। (५४)।**

---

(५४) साध्यतावच्छेदकप्रकारेण साध्यस्य विशिष्टवैशिष्ट्यावगाह्यनुमितिं प्रति अन्वयपरामर्श एव हेतुरित्यभिप्रायेण समाधत्ते "**वस्तुतस्तु**" इत्यादिना, "**अनुमितेर्विशेषणतावच्छेदकप्रकारके**"त्यादि, अयं भावः—विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकत्वमीश्वरज्ञानव्यावृत्ते विशिष्टवैशिष्ट्यावगाहिजन्यप्रत्यक्षत्व एव कल्प्यतां, तथा चानुमितौ तथाविधजन्यतावच्छेदकधर्माभावेऽपि न कापि क्षतिः, कथं न क्षतिरित्याह "**इतरव्यापकीभूताभावे**"त्यादिना, "**अन्वयव्याप्त्यनवगाहिपरामर्शदशायां**" व्यतिरेकव्याप्तिमात्रावगाहिपरामर्शदशायामित्यर्थः।

शङ्कते "**न चे**"ति वाच्यमिति परेणान्वेति। "**तादृशपरामर्शं विनापि**" अन्वयपरामर्शाभावेऽपि, "**स्वातन्त्र्येणैव**" पृथग्भावेनैव, "**तादृशपरामर्शविरहः**" अन्वयपरामर्शाभावः, "**अकिञ्चित्करः**" इतरभेदत्वेनेतरभेदावगाहिविशिष्टवैशिष्ट्यबोधात्मकानुमित्युत्पत्तौ न बाधकः। उक्तशङ्कां निरस्यति "तदानी"मित्यादिना। पुनः शङ्कते "**अथ एवं सति**" इत्यादिना, "**उक्तस्थले**" पूर्वप्रदर्शितस्थले, "**तथाविधानुमितेः**" विशिष्टवैशिष्ट्यानवगाहिन्याः केवलं विशेष्ये विशेषणमिति रीत्या उत्पन्नाया अनुमितेः, "**तादृशानुमितिस्थले च**" विशेष्ये विशेषणमिति रीत्या जायमानामनुमितिं प्रति त्वित्यर्थः। "**विशेषणज्ञानस्यापि हेतुताया अक्लृप्तत्वात्**" अत्रापिकारेणैवं सूच्यते—उक्तरीत्या जायमानानुमितौ विशेषणतावच्छेदकप्रकारकज्ञानस्य यथा न कारणत्वं तथा विशेषणज्ञानस्यापि न कारणत्वमिति बोध्यम्, "**तद्विरहस्ये**"तरभेदात्मकसाध्यज्ञानविरहस्य, "**अकिञ्चित्करत्वात्**" विशेष्ये विशेषणमिति रीत्या पृथिवी इतरेभ्यो भिद्यते इत्येवं साध्यप्रकारकानुमितेरबाधकत्वात्।

**एवञ्च लाघवविरहादनुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वे साधकविरहः, बाधाभावादिकार्यतावच्छेदकतया सिद्धेनानुमितिसाधारणपरोक्षत्वजातिविशेषेण प्रत्यक्षत्वस्य सङ्करापत्तिरूपबाधकञ्च जागरूकं, सङ्करश्च परस्परव्यभिचारिणोः परोक्षत्वप्रत्यक्षत्वयोरनुमितौ समावेशः।(५५)।**

**अनुमित्साविशिष्टानुमितिसामग्रीप्रतिबध्यतावच्छेदकतया सिद्धेनानुमित्यन्यज्ञानवृत्तिजातिविशेषेण सङ्करप्रसङ्गात् परोक्षत्वजातिरेवाप्रामाणिकीति चेत्, अनुमित्यन्यज्ञानवृत्तितादृशजात्या सङ्करप्रसङ्गेनानुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वानुपपत्तिः। तादृशजातिः शाब्दबोधस्मरणादौ, न तत्र प्रत्यक्षत्वं, तच्चानुमितौ भवन्मते, न तु सा जातिः, चाक्षुषादौ द्वयोः समावेशादिति**

---

अत्राकिञ्चित्करत्वादिति वाक्यात् परम् आदर्शपुस्तके "इति चेदित्थं तव तथाविधानुमितौ" इत्याकारः प्रमादाधीनो विकृतपाठो दृश्यते, तत्स्थले मया "**इति चेदिष्यत एव तत्र तथाविधानुमितिः**" इति परिवर्तिताकारः पाठो गृहीतः।

शङ्कामुत्थापयति "**अथे**"ति, "**एव**"मिति, साध्यज्ञानपर्यन्तविरहेऽपि व्यतिरेकपरामर्शाद् विशेष्ये विशेषणमिति रीत्या साध्यप्रकारकानुमितेस्तत्र इष्टत्वे इत्यर्थः। "**साध्यविशेष्यकानुमितिः**" पृथिव्यामितरभेद इत्याकारा आधेयतासम्बन्धेन पक्षप्रकारिका साध्यविशेष्यिकानुमितिः, "**विलीयते**" विलुप्ता स्यात् "**किमपचयः**" कः अपचय इति कर्मधारयसिद्धमिदं पदम्, का क्षतिरिति तदर्थः।

(५५) "**एवञ्च**" अनुमितित्वस्य प्रत्यक्षत्वव्याप्यतावादसंस्थापनाय पूर्वपक्षवादिभिरुद्भावितानां सर्वासां स्वमतलाघवप्रतिपादकयुक्तीनां खण्डितत्वे चेत्यर्थः। "**साधकविरहः**" लाघवात्मकसाधकस्याभावः, न च साधकाभावेऽपि बाधकविरहादेव व्याप्यतावादः सिध्येदिति वाच्यं, बाधकस्यापि सत्त्वात्, किं नाम तत्र बाधकमिति स्फुटयति "**बाधाभावादिकार्यतावच्छेदकतया**" इत्यादिना, बाधाभावादीत्यत्रादिपदेन विपरीतकोटिव्याप्यवत्त्वनिश्चयाभावस्य परिग्रहः। प्रत्यक्षं प्रति बाधनिश्चयाभावस्य कारणत्वं न सम्भवति, यतः सत्यपि शङ्खः पीतत्वाभाववानिति निश्चये दोषवशात् शङ्खः पीत इति प्रत्यक्षं जायते, जायते चान्यत्रापि बाधनिश्चयोत्तरमिच्छावशादाहार्यप्रत्यक्षम्, अतः परोक्षज्ञानत्वावच्छिन्नं प्रत्येव बाधनिश्चयाभावस्य कारणत्वं, बाधनिश्चयसत्त्वे तस्यानुत्पादात्। इत्थञ्च बाधनिश्चयाभावनिष्ठकारणतानिरूपितकार्यताया अवच्छेदकविधया परोक्षज्ञानत्वरूपः अनुमित्यादिनिष्ठो जातिविशेषः सिद्धः, तेन सह प्रत्यक्षत्वस्य सङ्करापत्तिः स्यात् यद्यनुमितावपि प्रत्यक्षत्वं स्यादिति भावः। अत्र सङ्करं स्फुटयति "**सङ्करश्चे**"त्यदिना। "**परस्परव्यभिचारिणोः**" इति घटादिचाक्षुषे प्रत्यक्षत्वमस्ति, परोक्षत्वं नास्ति, उपमितौ शाब्दबोधे च परोक्षत्वमस्ति, प्रत्यक्षत्वन्तु तत्र न वर्तत इति परस्परव्यभिचारित्वं बोध्यम्।

**सिद्धमनुमितेः प्रत्यक्षवैलक्षण्यम्, अतोऽनुमानस्य पृथक्प्रमाणत्वमिति, अनुमितेर्मानसत्वविचारः समाप्तः।(५६)।**

---

(५६) अनुमित्यन्यज्ञानत्वावच्छिन्नं प्रति अनुमित्साविशिष्टानुमितिसामग्रीत्वेन प्रतिबन्धकताया आवश्यकतया तादृशप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकविषयानुमित्यन्यज्ञानत्वस्वरूपो जातिविशेषः सिध्यतीत्यभिप्रायेणाक्षिपति "**अनुमित्साविशिष्टे**"-त्यादिना, "**सङ्करप्रसङ्गा**"दिति, अनुमित्यन्यज्ञानत्वशून्यायामनुमितौ परोक्षत्वमस्ति, परोक्षत्वशून्ये प्रत्यक्षे अनुमित्यन्यज्ञानत्वमस्ति इति रीत्या तयोः परस्परव्यभिचारित्वं, शाब्दबोधादौ च तयोः सामानाधिकरण्यम्, अतः सङ्करप्रसङ्गो बोध्यः। तादृशसङ्करप्रसङ्गेन परोक्षत्वजातेरप्रामाणिकत्वमिति पूर्वतनाक्षेपं खण्डयति "**इति चेदि**"त्यादिना, "**सङ्करप्रसङ्गेने**"ति, अत्रत्यसङ्करप्रसङ्गश्च अनन्तरं ग्रन्थकारेणैव प्रतिपादयिष्यते, "**अनुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वानुपपत्ति**"रिति, अनुमितित्वस्य प्रत्यक्षत्वव्याप्यत्वे सर्वत्रानुमितौ प्रत्यक्षत्वं स्यादेव, एवञ्चानुमित्यन्तर्भावेन प्रत्यक्षत्वे अनुमित्यन्यज्ञानत्वरूपप्रागुक्तजातिनिरूपितव्यभिचारित्वं स्यात्, तच्च सङ्करप्रयोजकम्, सङ्करे च सति तेन प्रत्यक्षत्वस्य जातित्वं व्याहन्येत, न हि प्रत्यक्षत्वजातेरपलापः शक्यः, इन्द्रियसन्निकर्षजन्यतावच्छेदकतया तस्याः सिद्धत्वात्, अतः सङ्करप्रसङ्गवारणायानुमितौ प्रत्यक्षभिन्नत्वमवश्यं स्वीकार्यमिति भावः। प्रत्यक्षत्वे अनुमित्यन्यज्ञानत्वनिरूपितसङ्करं प्रतिपादयति "**तादृशजाति**"रित्यादिना, "**तच्चानुमितौ भवन्मते**" इति, अत्र "भवन्मते" अनुमितित्वस्य प्रत्यक्षत्वव्याप्यतावादिमते, "तच्च प्रत्यक्षत्वञ्च, अनुमितावस्तीति शेषः, "**चाक्षुषादौ द्वयोः समावेशात्**" अत्र पञ्चम्यन्तपाठापेक्षया "समावेश" इति प्रथमान्तपाठ एव समुचितः प्रतिभाति, पूर्वप्रक्रमानुरोधात्, पञ्चम्यर्थस्यान्वयोपपत्तेर्दुष्करत्वाच्च। "**इति**" एवंविधयुक्तिबलात्, "**पृथक्प्रमाणत्वम्**" इत्यत्र आदर्शपुस्तके पृथक्कारणत्वमित्याकारः पाठ उपलभ्यते, किन्तु समीचीनत्वानुरोधेन कारणत्वमित्यत्र प्रमाणत्वमिति विहितमिति शम्।

शाके खसिद्धिवसुचन्द्रमिते बुधाद्य-
क्षेत्रस्थभास्वति रसेन्दुमिते कुजाहे।
एषा समाप्तिपदभाग् गुरुपूर्णिमायां
संप्रीतये भवतु मे गुरुदेवतानाम्॥

नैयायिककुलचूडामणि-महामहोपाध्याय-श्रीशिवचन्द्र-सार्वभौमभट्टाचार्यशिष्येण श्रीतारानाथ-न्यायतर्कतीर्थेन विरचिता सरलानाम्नी अनुमितेर्मानसत्वविचार-ग्रन्थस्य टीका समाप्ता।

Library IIAS, Shimla
S 181.43 H 225 A-H 225 A: 1
00000997